THE

KĀSHI SANSKRIT SERIES

(*HARIDĀS SANSKRIT GRANTHAMĀLĀ*)

NO. 79.

(Aurveda Section No. 2.)

रसाध्यायः

टीकयासंवलितः ।



JAI KRISHNADAS-HARIDAS GUPTA
McMASTER UNIVERSITY LIBRARY
PK 2971 .K29 no.79
The Rasadhyaya, with a comment C.1
3 9005 0459 1808 7

The Chowkhamba ... *Press.*
North of ... *ty.*

STORAGE

PK
2971
.K29
no.79

the auspices of His Highness Raol Shri Takhtsingji, Maharaja of Bhavnagar. 85-00

95 Commercial Guide to the Forest Economic Products of India by R. S. Pearson. 1912. 5-00

96 Commercial Policy of The Moguls by D. Pant. Foreword by Lord Meston. 1930. 80-00

97 Commercial Products of India, being an abridgement of 'The Dictionary of Sir George Watt. 1

Box 5987

98 Compaign in Tirah 1 against the Orakz William Lockhart 1 maps, plans and ill

99 Comparative and Cri special treatment Introduction to S Mohanlal Bhagwar K. V. Abhyankar mono-colour plates

100 Comparative Æsthet K. C. Pandey. Wit 1950.

101 Comparative Æsthet K. C. Pandeya.

Mills Memorial Library
McMaster University

102 Comprehensive Gran Adopted for the bed for the Civil Mendis Gunasekar

103 Comprehensive Hist Social, from the First Landing of the English to the suppression of the Sepoy revolt, including an outline of the Early History of Hindoostan by Henery Beveridge, Illustrated by above five hundred engravings. 3 Vols. MDCCCLXII. 200-00

104 Concepts of Riti and Guna in Sanskrit Poetics in their Historical developments by P. C. Lahiri. 1937. 30-00

105 Cosmic Psychological Spiritual Philosophy and Science of Communion with and absorption in the Holy and

156 Fables and Proverbs from the Sanskrit being the Hitopadesa. Translated by Charles Wilkins. With an introduction by Henry Morley. 1885. 15-00

157 Faiths of the World. A Concise History of the Great Religious System of the World. 1882. 30-00

158 Folk Tales from China. First Series. 2-50

159 Foote Collection of Indian Pre-historic and Proto-historic Antiquities. Catalogue Raisonne and Notes on their ages and distribution by Robert Bruce Foote. 1914 & 1916. 2 parts. 130-00

160 Footfalls of Indian History by the Sister Nivedita. With 6 coloured plates and 22 other illustrations. 1915. 25-00

161 Foreign Vocabulary of the Quran by Arthur Jeffery. 1938. 100-00

162 Forgotten Empire (Vijayanagar) : A contribution to the History of India by Robert Sewell. 1924. 75-00

163 Fragments of the Commentaries of Skandasvamin and Mahesvara on the Nirukta. Edited for the first time from the original palm leaf and paper manuscripts, written in Malyalam and Devanagri characters, with an Introduction and critically notes by Lakshman Sarup. 1928. 500-00

164 Friendship of Buddhism. Compiled by the Buddhist Association of China. 11-00

165 Gadadhara Paddhati Kalasara by Gadadhara Rajaguru. Edited by Sadasiva Misra. 1900. (Bibliotheca Indica) 75-00

166 Ganakarika : a work on Philosophy (Pasupata School) by Bhasarvajna (10th Century) Edited by C. D. Dalal. 1921. 25-00

167 Garuda Purana of Sri Veda Vyasa. Edited by Pt. Sri Panchanan Tarka Ratna. 1812. 40-00

168 Garuda Purana. Prose English translation by Manmath Nath Dutt. 1908. 125-00

169 General Index to the Reports of the Archaeological Survey of India, Vols. I to XXIII. Published under the Superintendence of Major-General Sir A. Cunningham by Vincent Arthur Smith. With a glossary and general table of contents. 1887. 150-00

the auspices of His Highness Raol Shri Takhtsingji, Maharaja of Bhavnagar. 85-00

95 Commercial Guide to the Forest Economic Products of India by R. S. Pearson. 1912. 5-00

96 Commercial Policy of The Moguls by D. Pant. Foreword by Lord Meston. 1930. 80-00

97 Commercial Products of India, being an abridgement of 'The Dictionary of the Economic Products of India' by Sir George Watt. 1908. 150-00

98 Compaign in Tirah 1897-1898 account of the expedition against the Orakzais and Afridis under General Sir William Lockhart by Colonel H. D. Hutchinson. With maps, plans and illustrations. 1898. 50-00

99 Comparative and Critical Study of Mantrasastra (with special treatment of Jaina Mantravada) being the Introduction to Shri Bhairava Padmavati Kalpa by Mohanlal Bhagwandas Jhavery. With text by Prof. K. V. Abhyankar and eighty full-colour and thirty mono-colour plates. 1944. 200-00

100 Comparative Æsthetics. Vol. I—Indian Æsthetics by K. C. Pandey. With a foreword by S. Radhakrishnan. 1950. Price on application.

101 Comparative Æsthetics. Vol. II-Western Æsthetics by K. C. Pandeya. 20-00

102 Comprehensive Grammar of the Sinhalese Language. Adopted for the use of English Readers and prescribed for the Civil service examinations by Abraham Mendis Gunasekara. 1891. 50-00

103 Comprehensive History of India, Civil Military and Social, from the First Landing of the English to the suppression of the Sepoy revolt, including an outline of the Early History of Hindoostan by Henery Beveridge, Illustrated by above five hundred engravings. 3 Vols. MDCCCLXII. 200-00

104 Concepts of Riti and Guna in Sanskrit Poetics in their Historical developments by P. C. Lahiri. 1937. 30-00

105 Cosmic Psychological Spiritual Philosophy and Science of Communion with and absorption in the Holy and

156 Fables and Proverbs from the Sanskrit being the Hitopadesa. Translated by Charles Wilkins. With an introduction by Henry Morley. 1885. 15-00

157 Faiths of the World. A Concise History of the Great Religious System of the World. 1882. 30-00

158 Folk Tales from China. First Series. 2-50

159 Foote Collection of Indian Pre-historic and Proto-historic Antiquities. Catalogue Raisonne and Notes on their
by Robert Bruce Foote. 1914 &
130-00

ry by the Sister Nivedita. With
2 other illustrations. 1915. 25-00

the Quran by Arthur Jeffery.
100-00

jayanagar) : A contribution to
y Robert Sewell. 1924. 75-00

nentaries of Skandasvamin and
irukta. Edited for the first
palm leaf and paper manuscripts,
nd Devanagri characters, with
critically notes by Lakshman
500-00

sm. Compiled by the Buddhist
11-00

Kalasara by Gadadhara Rajaguru.
Misra. 1900. (Bibliotheca Indica) 75-00

n Philosophy (Pasupata School)
0th Century) Edited by C. D.
25-00

ri Veda Vyasa. Edited by Pt. Sri Panchanan Tarka Ratna. 1812. 40-00

168 Garuda Purana. Prose English translation by Manmath Nath Dutt. 1908. 125-00

169 General Index to the Reports of the Archaeological Survey of India, Vols. I to XXIII. Published under the Superintendence of Major-General Sir A. Cunningham by Vincent Arthur Smith. With a glossary and general table of contents. 1887. 150-00

170 Geschichte Der Sanskrit–Philologie and Indischen Altertumskunde von Ernst Windisch. 1917. 150–00

171 Glaucus or The Wonders of the Shore by Charles Kingsley. With coloured illustrations. 1890. 5–00

172 Glimpses of Peking. 3–75

173 Gobhiliya Grihya Sutra. Edited with Chandrakanta Tarkalankar commentary and Grihyasamgraha, Sraddhakalpa, Sandhyasutra, Snanasutra etc., by M. M. Chandrakanta Tarkalankara. (Bibliotheca Indica) 1880. 100–00

174 Gospel of Buddha According to Old Records. Told by Paul Carpus. 1895. 35–00

175 Gothic Ornaments by James K. Aolling Architect. 2 Vols. 1848. 200–00

176 **गोविन्द निबन्धावली** । स्व० पं० गोविन्द नारायण मिश्र 10–00

177 Grammar of the Hindustani Language by D. Forbes. With extracts for reading, a Vocabulary etc., 1858. 40–00

178 Grammar of the Hindustani or Urdu Language by John T. Platts. 1909. 40–00

179 Grammar of the Sanskrit Language by F. Kielhorn. (Pages 145–148 damaged). 1888. 35–00

180 Grammar of Ornament by Owen Jones. Illustrated by examples from various styles of ornament, One hundred and twelve plates. 1910. 300–00

181 Great Cities of The World. Their Government, Politics and Planning. Edited by William A. Robson. 56–00

182 Great Indian Religions : being a popular account of Brahmanism, Hinduism, Buddhism and Zoroastrianism. With accounts of the Vedas and other Indian sacred books, the Buddhist Sacred books, the Zendabesta, Sikhism, Jainism, Mithraism, etc., by G. T. Bettany. With numerous illustrations. 1892. 47–50

183 Grihya Sangraha. An appendix to the Gobhil Grihyasutra. With the commentary by the editor. Edited by M. M. Chandrakanta Tarkalankar. 1910. (Bibliotheca Indica). 35–00

184 Guide to the Sculptures in the Indian Museum by N. G. Majumdar. Part I–Early Indian School and Part II–The Graeco Buddhist School of Gandhara. 25–00

THE

KASHI-SANSKRIT-SERIES

(*HARIDAS SANSKRIT GRANTHAMĀLĀ*)

NO. 79

(Aurvoda Section, No. 2)

THE

RASĀDHYĀYA

With a Commentary

Edited By

PANDIT RAMKRISHNA SHARMA

JAI KRISHNADAS HARIDAS GUPTA,

The Chowkhamba Sanskrit Series Office, Vidya Vilas Press,

North of Gopalmandir, Benares City.

1930.

[ALL RIGHTS RESERVED BY THE PUBLISHER]

Printed-Published & sold by
JAI KRISHNADAS-HARIDAS GUPTA,
The Chowkhamba Sanskrit Series Office,
VIDYA VILAS PRESS,
North of Gopal Mandir,
BENARES CITY.

Printed by Jai Krishna Das Gupta
at the Vidya Vilas Press, Benares,

हरिदाससंस्कृतग्रन्थमालासमाख्य-
काशीसंस्कृतसीरीज़पुस्तकमालायाः

७९

आयुर्वेदशास्त्रविभागे (२) द्विसप्ततितमं पुष्पम् ।

रसाध्यायः

टीकयासंवलितः ।

पण्डित रामकृष्ण शर्म्मणा

सम्पादितः ।

प्रकाशक—
जयकृष्णदास-हरिदास गुप्त
चौखम्बा संस्कृत सीरिज़ आफिस,
विद्याविलास प्रेस, गोपालमन्दिर के [illegible],
बनारस सिटी ।

सं० १९८६.

राजकीयनियमानुसारेणास्य सर्वेऽधिकाराः प्रकाशकेन स्वायत्तीकृताः ।

इस कार्यालय द्वारा "चौखम्बासंस्कृतसीरिज" के अलावा और भी ३ सीरिज यथा "काशीसंस्कृतसीरिज" "बनारससंस्कृतसीरिज" "हरिदाससंस्कृतसीरिज" ग्रन्थ-मालायें निकलती हैं तथा इन ४ सीरिजों के पश्चात् और भी विविध शास्त्र की पुस्तकें प्रकाशित की गई है तथा अन्य सब स्थानों के छपे हुए संस्कृत तथा भाषा—भाष्य के ग्रन्थ विक्रयार्थ प्रस्तुत रहते हैं, सूचीपत्र पृथक् मंगवाकर देखें, इसके अलावा हमारे यहां सर्व प्रकार की संस्कृत, हिन्दी, अङ्ग्रेजी की सुन्दर छपाई होती है, परिक्षा प्रार्थनीय है ।

पत्रादि प्रेषणास्थानम्—

जयकृष्णदास-हरिदास गुप्तः—

"चौखम्बा संस्कृतसीरिज़" आफिस, विद्याविलास प्रेस,

गोपालमन्दिर के उत्तर फाटक, बनारस सिटी ।

प्राक्कथनम् ।



अयं लघुकायो ग्रन्थो रसप्रक्रियारसिकानां समुपयोगीति विधार्य नान्यत्र क्वापि मुद्रितचर इत्यपि च विचार्य प्रकाशकमहाशयेन प्रार्थितः सन्नस्य शोधनादिकार्येऽहं प्रवृत्तः । किन्तु प्रवर्तमानेन मया पाठनिर्धारणप्रमुखे कार्येऽतीवाऽऽयासोऽनुभूतिं नीतः । प्रथमं तावदेकमेवासीदादर्शपुस्तकम् । विषयश्चात्र प्रचलितप्रक्रियाविभिन्नप्रकारेण प्रतिपादितः । पारिभाषिकशब्देषु देशिपदानामत्रत्यजनापरिचितानां वाहुल्येन विशेषतो विघ्नितः शोधनादिव्यापारः । तथापि ग्रन्थान्तरस्थितविषयप्रतिपादनसंवादनेन पुनः पुनस्ततत्सामञ्जस्यादिपर्यालोचनेन च यथाशक्ति तथा विहितः प्रयत्नो यथाऽयं ग्रन्थो भवेदवबोधाय सुधियां तद्विषयनिष्णातानाम् । सत्यपि सप्रयत्ने मयि यदि सुधीभिरल्पमतिमानवसुलभानि स्खलितानि लक्ष्यीक्रियेरन्, तर्हि तैः सहृदयैः क्षन्तव्य एवायं विदुषां वशंवदो जनः ।

श्रीत्रिविक्रमात्मजैयादवशर्मभिराचार्यैरस्यग्रन्थस्यादर्शपुस्तकं प्रकाशकमहाशयायोपहारीकृतमिति तेषां महोपकारं सानन्दमभिनन्दामः ।

सम्पादकः ।

विषयानुक्रमणी

१	अष्टादशसंस्काराः	२—३१
२	राजिस्वरूपम्	३१—३४
३	खापरसत्त्वपातनविधिः	३४—३५
४	मनःशिलासत्त्वपातनविधिः	३५—३६
५	षड्लोहद्रुतिकरणविधिः	३६—३८
६	षड्लोहमारणविधिः	३६—३९
७–८	हीरकविधिः	३९—४३
९	गन्धकशोधनम्	३९—४३
१०	गन्धपीठी	४६—४८
११	गन्धतैलम्	४८
१२	हेमकर्म	४८—५०
१३	सहस्रवेधरसविधिः	५०—५१
१४–१५	गन्धकद्रुतिपीठी तत्कर्माणि च	५१—५३
१६	तालकशोधनम्	५३—५४
१७	शुद्धतालककर्माणि	५४—५७
१८	अभ्रकद्रुतिः	५७—६०
१९	अभ्रकद्रुतिकर्माणि	६०—६१
२०	हेमवज्रभस्मभूनागसत्त्वकर्माणि	६१—६४
२१	बालवादिनीगुटिका	६५

श्रीगणेशाय नमः ।

ॐनमः श्रीगुरुपादुकाभ्यः ।

अथ

सटीको रसाध्यायग्रंथः ।

सिद्धिः श्रीनामतो येषां भवेत्सर्वेप्सितं श्रियाम् ।
नत्वा तानर्हतः कुर्वे कंकालाध्यायवार्त्तिकम् ॥ १ ॥
गुरुभ्यः किंचिदाकर्ण्य तज्ज्ञैः संसृज्य किंचन ।
किंचिदप्यनुभूयासौ ग्रंथो विव्रीयते मया ॥ २ ॥
प्रोक्तोऽपि गुरुणा साक्षाद्धातुवादो न सिद्ध्यति ।
यावन्न दृश्यते द्विस्त्रिर्गुरुपार्श्वे क्रियाविधिः ॥ ३ ॥
यस्मात्तस्मादपि श्रुत्वा यत्र कुत्रापि वीक्ष्य च ।
द्रव्यव्ययं प्रकुर्वन्तो मुधा ताम्यंति बालिशाः ॥ ४ ॥
प्रसन्नीभूय चेत्सर्वं दर्शयेत्कर्म सद्गुरुः ।
लीलयापि तदा सर्वे योगाः सिद्ध्यन्त्यसंशयम् ॥ ५ ॥
ततोऽत्र व्यक्तमुक्तेऽपि ग्रंथार्थे मुख्यनिश्चयात् ।
गुरूनुपेक्ष्य नो कार्यो धातुवादे परिश्रमः ॥ ६ ॥

किञ्च—

वक्ति यो न स जानाति यो जानाति न वक्ति सः ।
ततो यत्रापि तत्रापि प्रसार्यं न मुखं बुधैः ॥ ७ ॥
रसगुह्यंजनाभिज्ञः श्रीकंकालययोग्यभूत् ।
तेन स्वशिष्यशिक्षार्थं रसतत्त्वं निवेदितम् ॥ ८ ॥
श्रीकंकालयशिष्योऽपि स्वान्योपकृतये कृती ।
एकविंशत्यधीकारं रसाध्यायं निबद्धवान् ॥ ९ ॥

तत्रादावेव निर्विघ्नं प्रारब्धकार्यसिद्धयर्थमभीष्टदेवतानमस्कारमाह—

श्रीभैरवं प्रणम्यादौ सर्वज्ञं त्रिजगत्प्रभुम् ।
श्रीभारतीं च विघ्नेशं वन्दे प्रत्यूहशान्तये ॥ १० ॥
ब्रह्मचर्यं तपः कार्यं हविष्यान्नस्य भोजनम् ।
क्रियाभ्रष्टे न सिद्ध्यंति तपोनष्टे फलन्ति न ॥ ११ ॥

इह रसकर्माणि चतुरशीतिः (८४), गुटिकाभेदाश्चतुरशीतिः (८४), अञ्जनानि चतुरशीतिः (८४) । एवं ते द्विपंचाशदधिके द्वे शते (२५२) भेदाः । तत एतेषां भेदानां मध्याद्यदैका काचित् क्रिया प्रारभ्यते तदा प्रारंभात्पूर्वं मासमेकं ब्रह्मचर्यरूपं तपः कर्त्तव्यम् । ब्रह्मचर्यस्यैव सर्वतपोमूलत्वात् । तद्रहितस्यापरतपसः सर्वस्यापि निष्फलत्वात् । यद्वा ब्रह्मचर्यं धार्यम् । तथाऽऽचार्यादिना यथायुक्त्या तपः कार्यम् । द्वयोरपि सर्वकर्म्मफलानामादिमूलत्वात् । तथा हविष्यान्नं घृतशर्करामिश्रं पायसं क्षीरभोजनं कार्यम् । अपरैराहारैर्देहशुद्धेरभावात् । प्राणायामसाधनाभावाच्च । तत एवं कर्म्म पालयता तत्कर्म्मफलं यावन्नेतव्यम् । यतो रसादिका क्रियाः साधके भ्रष्टे यथोक्तभोजनमकुर्वति न सिद्धयन्ति । तपोनष्टे न च फलंति । एतच्च ग्रन्थांते स्वयं स्पष्टयिष्यति ॥

अथाऽध्यायं समायातं श्रीकंकालययोगिनः ।
वदामि व्याख्तितो यत्र युक्तिभिः शृंखलारसः ॥ १२ ॥

श्रीकंकालययोगिसमीपात्समायातमध्यायं वदामीति शिष्यवचनम् । यत्राध्याये शृंखलारसो युक्तिभिरौषधभावनाऽग्निपुटादिविधिभिः प्रकटीकृतोऽस्ति । यथा किल शृङ्खला पूर्वपूर्वतरावयवैरन्योन्यानुप्रवेशात् संबद्धा भवति तथा अत्रापि । पूर्वं रसस्य शोधनम् ॥१॥ ततः शोधितरसस्य मूर्छितोत्थापनम् ॥२॥ मूर्छितोत्थापितस्य पातनम् ॥३॥ पातितस्य च पुनरुत्थापनम् ॥४॥ पातितोत्थापितस्य स्वेदनम् ॥५॥ स्वेदेन स्वेदितस्य च नियामित्वम् ॥६॥ नियामितस्य निरोधकत्वम् ॥७॥ निरोधितस्य च वक्रप्रसारणम् ॥८॥ वक्रप्रसारितस्य चाभ्रकजारणम् ॥९॥ जीर्णाभ्रकस्य च लोहजारणम् ॥१०॥ जीर्णलोहस्य चायःप्रकाशराजिजारणम् ॥११॥ जीर्णायःप्रकाशराजेश्च हेमराजिजारणम् ॥१२॥ जीर्णहेमराजेर्गंधकजारणम् ॥१३॥ जीर्णगंधकस्य च मनःशिलासत्वजारणम् ॥१४॥ जीर्णशिलासत्त्वस्य च खापरसत्वजा-

रणम् ॥१५॥ जीर्णखापरसत्त्वस्य चान्नपथ्यहीरकजारणम् ॥१६॥ जीर्णवज्रस्य च बंधः ॥१७॥ बंधस्य सारणम् ॥१८॥ सारितस्य च मारणम् ॥१९॥ मारितस्य च तस्य क्रामणम् ॥२०॥ क्रामितस्य च बंधः ॥२१॥ बंधस्य चोद्धाटनम् ॥२२॥ इति । एवं पूर्वपूर्वतरसंस्कारयुक्तस्य रसस्याग्रेतनसंस्कारो ग्रंथितोऽस्तीत्यसौ प्रोच्यत इति तत्त्वम् ।

सूतदोषांस्ततः शुद्धिं संस्कारात्प्राक् वदाम्यहम् ।
रसानां फलमुत्पत्तिं देहलोहरसायनम् ॥ १३ ॥

सूतस्य पारदस्य द्वादश दोषान् । तेषां दोषाणामपगमोपायैः शुद्धिं निर्मलतां ततोऽष्टादश १८ पाटसारणादीन् संस्कारान् पूर्वं वदामि । ततः संस्कृतानां रसानां तारादिनिष्पत्तिरूपं फलम् । ततो हेमराज्यादीनां खापरसत्त्वादीनां चोत्पत्तिम् । तता देहसाधकम् । लोहसाधकं च रसायनं वदामीति श्रीकङ्कालयशिष्यवचः । अत्र क्रमेण प्रतिज्ञातोत्तरमाह ।

मृण्मयः कंचुकश्चैको द्विकः पाषाणकंचुकः ।
तृतीयो जलजातश्च द्वौ द्वौ च नागवङ्गजौ ॥ १४ ॥
कपालि कालिका वङ्गे नागे श्यामकपालिके ।
यादृशी च तरा दुग्धे तद्रूपे द्वे कपालिके ॥ १५ ॥
पंचवर्णा भवेत्श्यामा कालिका कृष्णवर्णिका ।
सदा मृतस्य जायंते सहजाः सप्त कंचुकाः ॥ १६ ॥

श्लोकत्रयमपि स्पष्टम् । केवलं द्वौ द्वौ च वंगनागजौ । इति द्वौ वंगजौ दोषौ द्वौ च नागजौ । कपालि कालिका चेति चतुर्थपञ्चमौ । वंगजौ दोषौ श्यामकपालिका चेति षष्ठसप्तमौ नागजौ एतेषां चतुर्णां लक्षणमाह । दुग्धे क्वथिते सति यादृशी तरा उपरि भवति । रसेऽपि तादृशी वङ्गजा । नागजा च कपालिका उपरि भवति । श्यामा च षष्ठो दोषः पंचवर्णो भवति कालिका च पंचमो दोषः कृष्णवर्ण इति ।

अथ रसस्य पंच दोषानाह—

मलदोषो भवेदेको द्वितीयो वह्निसंभवः ।
विषदोषस्तृतीयस्तु चतुर्थो दर्पसंज्ञकः ॥ १७ ॥
उन्मत्तः पञ्चमो दोषो दोषा पञ्च सदा रसे ।

सार्धश्लोकः स्पष्टः। अत्र च जलमध्ये मृत्तिकापाषाणजलान्तरसंयोगात् तथा दुग्धोपरि तरादच्च ये दृश्यन्ते ते कञ्चुका उच्यन्ते। ये पुनः कोद्रवेषु मदवद्भवन्ति ते दोषा इति विशेषः।

अथैतेषां दोषाणां प्रत्येकं विकारानाह—

मृण्मयात्कंचुकात्कुष्ठं जायते च शरीरिणाम् ॥ १८ ॥
पाषाणाज्जायते जाड्यं वातस्तोमश्च वारिजात्।
कुर्यातां चिल्हरी देहे वंगनागकपालिके ॥ १९ ॥
गजचर्म्माणि दद्रूणि कुरुते कालिका सदा।
पांडुरोगं तथा मोहं दुभितानि च कामलाम् ॥ २० ॥
जायते श्वेतकुष्ठं च श्यामाकंचुकसंभवम्।
हंति तेजः शरीरस्य मलः पारदसंभवः ॥ २१ ॥
सत्त्वघातं करोत्यग्निर्विषं घूर्म्मं करोति च।
दर्पादङ्गं स्फुटत्येवोन्मत्तादुन्मत्तता भवेत् ॥ २२ ॥
युक्तं द्वादशभिर्दोषैर्यस्तु दद्याच्च पारदम्।
ब्रह्महत्यादिका हत्या भवेयुस्तस्य सर्वदा ॥ २३ ॥
मुक्तं द्वादशभिर्दोषैर्दद्याद्यः पारदेश्वरम्।
महीयानिह लोके स्यात्परत्र स्वर्गभाग् भवेत् ॥ २४ ॥
दोषैर्द्वादशभिर्मुक्तो देहं नीरोगयेद्रसः।
संस्कारैर्द्वीपसंख्यैश्च (१८) संस्कृतो देहलोहकृत् ॥ २५ ॥

अष्टापि श्लोकाः स्पष्टा एव केवलं चिल्हरी कुष्ठभेद एव। इति सूतदोषगुणाख्यानं समाप्तम्।

सूतेऽष्टादशसंस्कारास्तत्राद्यः पाटसारणः।
द्वितीयो मर्दनो नाम तृतीयः शोधनो मतः ॥ २६ ॥
मूर्च्छनोत्थापनस्तुर्यः पञ्चमो रसपातनः ॥।
रसस्योत्थापनं षष्ठः सप्तमः स्वेदनो भवेत् ॥ २७ ॥
नियामको ऽष्टमः प्रोक्तो नवमस्तु निरोधकः।
दशमो मुखकारी स्यात् रुद्रसंख्यो हि जारणः ॥ २८ ॥

सूर्याको बंधकृत्प्रोक्तो यक्षसंख्यस्तुसारणः ।
मारणो मनुसंख्यः स्याच्चित्थ्यंकः प्रतिसारणः ॥ २९ ॥
क्रामणः षोडशांकः स्याद्वेधः सप्तदशीकृकः ।
अष्टादशश्च संस्कारस्तज्ज्ञैरुद्घाटनो मतः ॥ ३० ॥

श्लोकपञ्चकं स्पष्टम् । एते सूतस्याष्टादश संस्काराः । अथ क्रमेण संस्कारान् व्याख्यापयान्नाह ।

अथ पाटसारणः ।

वाससा गालिते सूते संस्कारः पाटसारणः ।
वंगनागादिकाः सर्वा वस्त्रे तिष्ठन्ति विक्रियाः ॥ ३१ ॥

प्रथमं सूतः श्लक्ष्णवस्त्रेण गालनीयो यथा वंगनागजाः पूर्वोक्तविकाराः सर्वे वस्त्रे लगित्वा तिष्ठन्ति । इति प्रथमः संस्कारः पाटसारणः ।

अथ मर्दनसंस्कारः ।

काष्ण्यं त्याजयितुं सूताद्विधेयो लोष्टजीवकः ।
तत्पलैकं च सूतस्य चतुःषष्टिपलानि च ॥ ३२ ॥
खल्वे प्रक्षिप्य संमेल्य मर्दयेद् यामपात्रतः ।
मर्दितो निर्मलीभूतः कृष्णत्वं त्यजति ध्रुवम् ॥ ३३ ॥

एकं पलं सुनिष्पन्नश्वेतलोष्टजीवकस्य चतुःषष्टिपलानि च पारदस्योभयं संमेल्य खल्वे क्षिप्त्वा प्रहरमेकं मर्दयेत् । यथा कालिकां त्यक्त्वा निर्मलीभवति पारदः इति मर्दनसंस्कारो द्वितीयः ।

अथ शोधनम् ।

वज्रीक्षीरेण संपिष्टात्सप्ताहं याति भूमिजः ।
सप्ताहं चार्कदुग्धेन पिष्टाद्यात्यश्मकंचुकः ॥ ३४ ॥

स्नुहीदुग्धेन खल्वे रसः क्षिप्त्वा सप्त दिनानि मृद्यते । ततो भूमिजः कंचुको याति । एवं सप्त दिनानि अर्कदुग्धेन मर्दिते पाषाणकंचुको याति ।

पर्पटान् ब्रह्मवृक्षस्य जलक्लिन्नांश्च वर्त्तयेत् ।
तद्रसेन च सप्ताहं पिष्टाद्यात्यंबुकंचुकः ॥ ३५ ॥

पलाशस्य पर्पटान् जलेन क्लेदयित्वा ततो वर्त्तयित्वा वस्त्रेण निश्चोत्य रसो ग्राह्यः। तेन रसेन सप्त दिनानि रसो मृद्यते। यथा जलजकंचुको याति।

चित्रककाथसंपिष्टात्कापाली याति वंगजा।
वज्रकंदरसेनैव पिष्टाद्वंगजकालिका ॥ ३६ ॥
कटुतुंबीपयः पिष्टात्श्यामा नश्यति नागजा।
बीयाजलेन संपिष्टात्कपाली नागसंभवा ॥ ३७ ॥
सप्तसप्तदिनैः पिष्टात्सूतान्नश्यंति कंचुकाः।

सार्धश्लोकद्वयं स्पष्टम्। केवलं वज्रः स्नुहिकंदश्च सूरणस्तयोरसेन। अथ वा वज्राख्यः कंदः पर्वतभूमौ भवति। सर्वेऽपि कंचुका यथोक्तरसेन सप्तदिनानि सूतमर्दनेन नश्यन्तीति।

त्रिफलाक्काथसंपिष्टाद् व्रजत्येवं क्षयं मलः ॥ ३८ ॥
चित्रककाथसंपिष्टादग्निदोषः प्रणश्यति।
अश्वगंधारसेनैवं विषदोषः प्रशाम्यति ॥ ३९ ॥
नाह्यारसेन संपिष्टादर्पदोषो विनश्यति।
पिष्टात्कुष्यरसेनैवमुन्मत्तोऽपि विलीयते ॥ ४० ॥
सप्त सप्तदिनैः पिष्टादोषा नश्यन्ति पंच वै।
इत्थं द्वादशभिर्दोषैर्मुक्तः शुद्धो भवेद्रसः ॥ ४१ ॥

सार्धास्त्रयः श्लोकाः स्पष्टाः। केवलं अश्वगंधा आसंधिः।

औषधस्यौषधस्यान्ते क्षालयेत्कांजिकेन च।
कर्त्तव्या सूतसंशुद्धिरेकादशभिरौषधैः ॥ ४२ ॥

अत्र चायमाम्नायः। खल्वे रसोपरि यथोक्तौषधरसः क्षिप्यते। यथा यथा सूतो ब्रुडति तथातथा मर्दनीयः। शनैः शनैर्यदिचाग्रेतनौषधरसःशुष्यति तदा पुनः क्षेपणीयः। एवं सप्तदिनानि यदि मर्दितः पारदो भवति तदा कांजिकेन खरलो म्रियते पुनः शनैर्मृद्यते ततो वस्त्रवर्त्तयः क्षिप्त्वा तथा मुच्यन्ते तथा वर्त्तिप्रान्ताः भूमौ लगन्ति। तैश्च कांजिकं गलित्वा याति। एवं सूतः सर्वैरप्यौषधैः सप्तदिनानि पिष्ट्वा पश्चात्कांजिकेन क्षाल्यः। औषधानि चैकादशामूनि। वज्रक्षीरम् ॥१॥ अर्क-

क्षीरम् ॥ २ पलाशपर्पटः ॥ ३ चित्रककाथः ॥ ४ ॥ वज्रकंदः ॥५॥ कटु-तुम्बा ॥ ६ ॥ बीअंकः ॥ ७ ॥ त्रिफलाक्वाथः ॥८॥ पुनश्चित्रकक्वाथः ॥ ९ ॥ अश्वगंधा ॥ १० ॥ नाहि ॥ ११ ॥ अंकुष्य ॥ १२ ॥ अत्र चित्रक-क्वाथो द्विवेलं विद्यतेऽतो द्वादशभिरोषधैरेकादशैव इति सूतशोधन-संस्कारस्तृतीयः ॥ ३ ॥

अथ मूर्छनोत्थापनम् ।

क्वाथेन त्रिकटोः क्षुण्णं प्राकृतं शोधितं रसम् ।
रसेनाप्तन्नदूधिल्यास्तथार्द्राया रसेन च ॥ ४३ ॥
काकमाचीरसेनैवं देवदालीरसेन च ।
शुष्कं शुष्कं पुनः क्षुण्णं संमर्द्यामर्द्य शोषयेत् ॥ ४४ ॥
औषधस्यौषधस्यान्ते क्षालयेत्कांजिकेन च ।
प्रत्यौषधं दिनानीह सप्त सप्तैव मर्दयेत् ॥ ४५ ॥
मूर्छितोत्थापनं सूते कार्यं पंचाभिरौषधैः ।
तेजस्वी जायतेऽवश्यं मूर्छितोत्थितपारदः ॥ ४६ ॥

पूर्वरीत्या शोधितः पारदः खल्वे प्रथमं त्रिकटुक्वाथेन पूर्ववत् सप्तदिनानि संपिष्य शोषयेत्। ततः कांजिकेन क्षालनीयः। एवं भूमिदूधेल्या रसेन तत आर्द्ररसेन। तदनु कमाईरसेन। पश्चाद्-देवदालीरसेन। सप्त सप्त दिनानि मृदित्वा शोषयित्वा कांजिकेन धा-वनीयः। एवं च कृतेऽसौ मूर्छितोत्थितः पारद इत्युच्यते तेजस्वी च भवति। इति मूर्छितोत्थापनसंस्कारश्चतुर्थः ॥ ४ ॥

अथ पातनम् ।

कज्जलाभो यदा सूतो विहायघनचापलम् ।
संमूर्छितस्तदा ज्ञेयो नानावर्णोऽपि तत्क्वचित् ॥ ४७ ॥
उत्थापयेन्निरुध्याथ पात्रसंपुटमध्यगम् ।
पुनस्तन्मूर्छयेत्सूतं कंचुकीर्नाशयेत् ततः ॥ ४८ ॥
एवमेतत्क्रमेणैतत् सप्तवारांस्तुमूर्छयेत् ।
इत्थं संमूर्छितः सूतो दोषशून्यः प्रजायते ॥ ४९ ॥

अन्यमतमथोत्थापनम्—

आरनालमृते सूतमुत्थाप्यं रसधीमता ।
मूर्च्छितोत्थितसूतस्य चतुःषष्टिपलानि च ॥ ५० ॥
पलानि ताम्रचूर्णस्य खल्वे प्रक्षिप्य षोडश ।
निम्बुकं च रसं क्षिप्त्वा लूणं द्वात्रिंशदंशकम् ॥ ५१ ॥
तावत्संमर्दयेद्यावत् पीठी स्यान्मृक्षणोपमा ।

मूर्छितोत्थितपारदस्य पल० ६४ सर्वोत्तमताम्रचूर्णस्य पल० १६ द्वात्रिंशत्तमेभागे लवणं पल० १ इत्यर्थः । सर्वं सर्वं एकीकृत्य निंबुकरसेन संमृद्य मृक्षणोपमा पीठी कार्या । अयमम्नायः । यावन्मात्रा रसस्तस्य चतुर्थे भागे ताम्रचूर्णं द्वात्रिंशत्तमभागे लवणम् । निंबुकरसश्च तथा क्षेप्यो यथा सर्वमौषधं मज्जति । अधिके दोषो नहि हीने तु दोषः । शुष्के शुष्के पुनः क्षेप्यः । मर्दनं च तावद्यावन्मृक्षणोपमा पीठी ।

मुक्त्वा कटाहबुंधे तां पदद्याद्वस्त्रसंपुटम् ।
वस्त्रांतानि मृदा लिम्पेज्जारितानीव बुंधके ॥ ५२ ॥
सजलस्थालिकावक्त्रे कटाहं प्रधरं क्षिपेत् ।
कंठं कटाहबंधं च लिंपेद्वस्त्रं मृदा तथा ॥ ५३ ॥
छाणकानि कटाहात्ते यामार्धंज्वालयेद्यथा ।
जलमध्ये रसो याति ताम्रे तिष्ठति बुंधके ॥ ५४ ॥
सप्तवारमिदं कार्यं शुद्धं स्याद्रसपातनम् ।
सूक्ष्मदोषा विलीयते मूर्च्छितोत्थितपातने ॥ ५५ ॥

घटार्द्धसदृशे कटाहेऽधो मृत्तिकायाः कुण्डली कार्यते तच्चकटाहबुंधमित्युच्यते । ततः पूर्वकृतां तां पीठीं तत्र कटाहबुंधे क्षिप्त्वोपरि आच्छादनार्थ सबलचिक्कणवस्त्रसंपुटं ताडयित्वा तस्य वस्त्रस्य प्रांतान् कुंडलीं परितश्चिक्कणमृदा तथा लिंपेद्यथा जटिता इव ते भवेयुः । ततस्तं कटाहं जलार्धपूर्णस्थालिकामुखोपरि प्रधरं मुक्त्वा स्थालीकंठकटाहबुंधकसंयोगस्थाने कर्पटमृदं दृढं दत्वा कटाहमध्ये छाणकानि घटीचतुष्कं यावज्ज्वाल्यंते । ततोऽग्नितापेन रसो वस्त्र-

तंतुछिद्रैर्विनिःसृत्याधःस्थालिकास्थितजलमध्ये याति । ताम्रं पुनर्बुधक एव विलग्य तिष्ठति । ततः पुनरपि पूर्ववत्ताम्रचूर्णपारदपीठीं कृत्वा कटाहबुंधसजलस्थालिकायंत्रेण पूर्ववद्रसो जले पात्यते । एवं सप्तवारं रसपातने कृते कुंठत्वजडत्वादयः सूक्ष्मदोषा यान्ति ।

इति मूर्च्छितोत्थापितसूतस्य पातनसंस्कारः पंचमः ॥ ५ ॥

अथोत्थापनम् ।

खल्वेन सहितं सूतं मर्दयेच्च दिनत्रयम् ।
पूर्ववत्पातयेत्तं तु अधोर्ध्वं तिर्यगं च तत् ॥ ५६ ॥
एवं पातनयंत्रेण सप्तवारं तु पातयेत् ।
सूतमभ्रं द्वयं मर्द्यं कांजिकेन समंततः ॥ ५७ ॥
स्थालिकातलमध्येऽपि स्थाप्यं तत् कृतगोलकम् ।
त्रिफलाराजिकावह्निविषशिग्रुसमांशकैः ॥ ५८ ॥
ऊर्ध्वस्थाली समालिप्य कर्त्तव्यं संपुटं वरम् ।
संधौ च मृत्स्नयावेष्ट्य डमरुं यंत्रमुत्तमम् ॥ ५९ ॥
कार्या चास्योर्द्धभागेऽपि कुंडली विहिता परा ।
तदधो ज्वालयेदग्निं मंदं मंदं त्रियामकम् ॥ ६० ॥
अधः स्थालीं परित्यज्य चोर्ध्वस्थाल्यां परित्रजेत् ।

पुनरन्यमतम्—

कासीसं सैंधवं सूतं तत्तुल्यं च दिनावधि ।
कासीसस्य ह्यभावेन दातव्या फुल्लतूरिका ॥ ६१ ॥
स्तोकं स्तोकं क्षिपेत्खल्वे त्रयमेकत्र मर्दयेत् ।
प्रत्येकं शतनिष्कं स्यादूनं नैवाधिकं क्वचित् ॥ ६२ ॥
स्थालिसम्पुटयन्त्रेण दिनं चण्डाग्निना पचेत् ।
ऊर्ध्वलग्नं तु तं शुद्धं पारदं चाहरेत् शुभम् ॥ ६३ ॥

अन्यमते—

पत्राणि ताम्रस्य लघूनि पिष्ट्वा कृत्वा रसेन त्रिगुणेन भांडे ।
× × × × ॥ ६४ ॥

ताम्रात्सूतं रसात्ताम्रं पातनाय पृथक्कृतम् ।
द्वयं तथैव संपिष्य पीठी कार्या च पूर्ववत् ॥ ६५ ॥
तां ताम्रसूतयोः पीठीं स्थालिकायां क्षिपेत्पुनः ।
स्थालिं चाधोमुखीं त्वन्यां लिंपेद्वस्त्रमृदा मुखे ॥ ६६ ॥
यन्त्रो डमरुकाख्योऽसौ तथा विद्याधराभिधः ।
उपरि स्थालिकाबुंधे दातव्यं गोमयं ततः ॥ ६७ ॥
अधः स्थाल्यास्त्वधो बुन्धे यामं मृद्वग्निना पचेत् ।
सूतो यात्युपरिस्थाल्यास्ताम्रं तत्रैव तिष्ठति ॥ ६८ ॥
सप्तवेलमिदं कार्यं सूतोत्थापनमुच्यते ।
व्यापको जायते स्वच्छः पातितोत्थापितो रसः ॥ ६९ ॥

पूर्वस्मिन् योगे पातनसंस्कारार्थं ताम्रात्सूतः सूताच्च ताम्रं पृथक् सप्तवारकृतम् । इहापि योगे तदेव करिष्यते परं तत्र पातनायेहैव पातितस्योत्थापनायेति विशेषः । तच्चैवम् । रसपल०६६ ताम्रचूर्णपल०१६ लवणपल०२ सर्वं निंबुकरसे मृदित्वा पूर्ववत्पीठी कृत्वा स्थालिकायां क्षिप्त्वोपरि च मध्ये मुखस्थालीं दत्वा द्वयोर्मुखयोगे कर्पटमृत्तिकया लिप्यते । एष डमरुकनामा विद्याधरनामा च यन्त्र उच्यते । ततो या उपरि स्थाली तस्या बुन्धे बाह्यपार्श्वे गोमयं दत्वाधस्तनस्थबुन्धाधो याममात्रं मृदुवह्निज्वालनीयः । ततः सूत उड्डीयोपरितनस्थाल्यां याति । ताम्रं चाधः स्थाल्यां तिष्ठति । एवं पुनः पुनः सप्तवारं सूतोत्थापने कृते रसो व्यापको भवति । व्यापको नाम तीक्ष्णः प्रसरणशीलश्च ।

इति पातितरसस्योत्थापनसंस्कारः षष्ठः ॥ ६ ॥

अथस्वेदनम् ॥

शिग्रुवृक्षस्य पत्राणि वारिणा वर्त्तयेद्यथा ।
जायतेऽतिमृदुः पिंडः कुर्यात्पिंडस्य कुल्हडीम् ॥ ७० ॥
ताम्रं त्यक्त्वोत्थितं सूतं लुणं द्वात्रिंशदंशकम् ।
कृतप्राक्कुल्हडीमध्ये प्रक्षिपेत्तं समग्रकम् ॥ ७१ ॥
आरनालं क्षिपेत्स्थाल्यां रसं निंबुकसम्भवम् ।
कंठे काष्ठं च बध्नीयाद्वस्त्रे प्राक्कृतकुल्हडीम् ॥ ७२ ॥

काष्ठे वस्त्रं च बध्नीयान्न स्पृशेत्कांजिकं यथा ।
पिहितायां तथा स्थाल्यां मृद्वग्निज्वालयेदधः ॥ ७३ ॥
प्रत्यहं त्वष्टयामं च कार्यं सप्तदिनानि वै ।
प्रत्यहं शिग्रुपत्रैश्च कार्या कुल्हडिका नवा ॥ ७४ ॥
नष्टं नष्टं चारनालं प्रक्षिपेन्नूतनं मुहुः ।
दोलायन्त्रेण कर्त्तव्या रसस्य स्वेदने विधिः ॥ ७५ ॥
स्वेदनैर्वह्निरुत्पन्नो रसो जातो बुभुक्षितः ।
संप्रत्यूर्धरसोऽत्यर्थं सहतेऽग्निं विपाचने ॥ ७६ ॥

शिग्रुनाम्नो वृक्षस्य पत्राणि गाढं मृक्षणोपमानानि वर्त्तयित्वा तेषां पिंडेन कुल्हडीं कृत्वा तस्यां कुल्हडिकायां पूर्वविधिना ताम्रं परित्यज्योद्दीनं रसं तथा द्वात्रिंशत्तमेन भागेन लवणं च क्षिप्त्वा तां कुल्हडीं वस्त्रे बध्वा तद्वस्त्रं दवरकेण काष्ठे बध्वा तत्काष्ठं स्थाल्याः कंठे कंचन पट्टं बध्वा स्थालीमध्ये त्रिभागनिंबुकरससहितकांजिकं क्षिप्त्वा कांजिकोपरि ज्रूबमाना (?) तथा वस्त्रं बध्वा कुल्हडी मोक्तव्या यथा कांजिकं न लगति केवलं बाष्पो लगति । ततोऽहोरात्रं स्थाल्या अधोऽग्निर्ज्वालनीयः । ततः पुनरपि शिग्रुपत्रैर्नवां कुल्हडीं कृत्वा दोलायन्त्रेण तथैवाहोरात्रं रसः स्वेदनीयः । यदि चाग्रेतनं कांजिकं शुष्यति तथा पुनर्नवं कांजिकं क्षेप्यम् । एवं सप्तभिर्दिनैः सप्तभिः कुल्हडीभिः सप्तवारं स्वेदितो रसः संप्रत्यूर्ध्वं पच्यमानो ऽत्यर्थमग्निं सहते ।

इत्युत्थापितरसस्य स्वेदनसंस्कारः सप्तमः ॥ ७ ॥

ग्रन्थान्तरे स्वेदनम्—

राजिकालवणव्हिमूलकै रूषणाइकयुतैः कलाशकैः ।
पारदस्य मृदुवह्नितस्त्विदं स्वेदनं तुषजलेन तन्यते ॥ ७७ ॥

स्वेदनयंत्रमाह—

कांजिकौषधपत्रांतः पोटलीमध्यलम्बनः ।
चुल्हाग्नौ स्वेद्यते स्वेद्यं यत्रेदं दोलयन्त्रकम् ॥ ७८ ॥
वस्त्रं चतुष्पुटं कृत्वा खेगेनापि पुटीकृतम् ।
स्वेद्यं सूतं च मंदाग्नौ यथा नोपक्षयं व्रजेत् ॥ ७९ ॥

व्योषार्द्रशिग्रुकन्दश्च मयूरमूलकासुरी ।
कांजिकेन च संस्वेद्यं सूतं बुद्धिमता दिनम् ॥ ८० ॥
गोमहिष्याश्च मेषाणां खरमूत्रैश्च पंचभिः ।
पंचभिर्लवणैः क्षारैः स्वेदनीयं रसेश्वरम् ॥ ८१ ॥
चांगेरी कांजिकं निंबुजंबीरबीजपूरकैः ।
रसैः संस्वेदनीयं च पारदं मुखवांछया ॥ ८२ ॥

अथनियामकः—

उत्तरस्यां भवेत्स्थूलो रक्तसैंधवखोटकः ।
तद्गर्भे रंध्रकं कृत्वा सूतं च स्वेदितं क्षिपेत् ॥ ८३ ॥
ततश्च चणकक्षारं दत्वा चोपरि नैम्बुकम् ।
रसं प्रक्षिप्य दातव्यस्तादृक् सैंधवषोटकः ॥ ८४ ॥
गर्त्तां कृत्वाथ भूगर्भे क्षिप्त्वा सैंधवसंपुटम् ।
धूलिमृष्टांगुलिं दत्वा कारीषं दिनसप्तकम् ॥ ८५ ॥
वह्निं संज्वाल्य तद्ग्राह्यं क्षालयेत्कांजिकेन च ।
अयं नियामको नाम संस्कारो ह्यष्टमः स्मृतः ॥ ८६ ॥
चणकक्षारनाशे च चूर्णं स्यान्नवसारजम् ।
साजीक्षारस्य तन्नाशे क्षारो झींजरटस्य च ॥ ८७ ॥
हिंगुपूषा च तन्नाशे तथैरंडफलानि च ।
पूषां दत्वा च प्रत्येकं प्रक्षिपेन्नैम्बुकं रसम् ॥ ८८ ॥
अतीवाग्निसहो जातः पारदोऽसौ नियामकः ।
अन्नार्थं रसना लोला निःशंकं संस्कृतः सदा ॥ ८९ ॥

उत्तरस्यां दिशि यः स्थूलो रक्तः सैंधवखोटको निष्पद्यते । तस्य मध्यात्कीयं छिद्रं च विधाय स्वेदितं रसं तत्र क्षिप्त्वोपरि चणकक्षारो देयस्तत उपरि स्वल्पो निम्बुकरसः क्षेप्यः । ततस्तस्य छिद्रस्याच्छादनायोपरि तादृश एव रक्तसैंधवखोटको देयः । अत्र चेयं बुद्धिः । यावन्मात्रं छिद्रमधःखोटके भवति तावती भूमिर्द्वितीयखोटकस्य मध्ये मुक्त्वोपरितः किंचिदुत्कीर्यते । तस्मिंश्चोपरि दत्ते तत्सैंधवसंपुटं

भवति। ततो भूमौ गजप्रमाणां गर्त्तां कृत्वा तत्र सैंधवसंपुटं मुक्त्वोपर्यष्टांगुलिमानां धूलिं दत्वा छगणचूर्णेन गर्त्तं पूरयित्वाऽग्निर्ज्वालनीयः। ततः प्रभाते निष्कास्य कांजिकेन प्रक्षाल्य पुनः सैंधवपुटे क्षित्वोपरि नवसारचूर्णं निंबुकरसं च मुक्त्वोपरि सम्पुटं च दत्वा पुनर्गर्त्तायां मुक्त्वाऽहोरात्रं कारीषाग्निर्ज्वालनीयः। एवं सप्तवारं सप्तदिनैः सप्तदिनैः संस्कार्यः। तृतीयदिने साजोक्षारः। चतुर्थेदिने झीजरीटक्षारः। पंचमदिने हिंगुपुषा षष्ठदिने सप्तमदिने चैरन्डफलचूर्णम्। सर्वेषामुपरि निम्बुकरसः क्षेप्य एव। एवं कृतेऽसौ नियामको रसोऽतीवाऽग्निं सहते। तथा किंचिदुनन्नबुभुक्षो जिह्वां चलयति।

इतिस्वेदितरसस्य नियामकसंस्कारोऽष्टमः॥ ८॥

अथरोधनम्॥

काचकुंपे मृदा लिंपेन्मध्ये नियामकं रसम्।
क्षिप्त्वास्ये चीवरं बध्वा छन्नं कोडीअकेनच॥ ९०॥
भूगर्त्ते कुम्पिकां क्षिप्त्वा दत्वा चोपरि वालुकाम्।
कारीषाग्निं प्रतिदिनं ज्वालयेदिनसप्तकम्॥ ९१॥
कुंपिकाया रसो ग्राह्यो विधिप्रोक्तो निरोधकः।
रसनां लेलिहानश्च पीडितोऽतिबुभुक्षया॥ ९२॥

काचकुंपिकायां चिक्कणां मृदं दत्वा मध्ये नियामकं रसं क्षिप्त्वा मुखे कोडीयकम्। कोर्थः? लोष्टचातिकां दत्वा। उपरिकर्पटं मृत्तिकां च दत्वा शोषयेत्। ततो भूमौ गजप्रमाणां गर्त्तां कृत्वा तत्र क्षिप्त्वोपरि अष्टांगुलिधूलिं दत्वाऽहोरात्रं कारीषाग्निर्ज्वालनीयः। ततः पुनः प्रभाते रक्षां कृत्वा नवं छगणचूर्णं क्षिप्त्वाऽहोरात्रं च कारीषाग्निर्ज्वालनीयः। एवं सप्तभिर्दिनैः सप्तवारं संस्कृतोऽसौ निरोधको नाम रसो महाबुभुक्षया पीडितो जिह्वां लेलिह्यमानः कुंपितो ग्राह्यः।

इति नियामकस्य निरोधकसंस्कारो नवमः॥ ९॥

अथ मुखकारी।

स्नुही च गिरिकर्णी च क्षीरिणी वज्रकंचुकी।
सर्पाक्षी मेघनादा च मत्स्याक्षी मृगभोजनी॥ ९३॥
शिरःपुंखा च चांगेरी वज्रवल्ली पुनर्नवा।

मधुकंसारिवे तिक्ता त्रायंती चंदनामृता ॥ ९४ ॥
अरण्यतुलसी कृष्णा शंखिनी रविभूलिका ।
एतानि यामिका प्रोक्ता रसकर्मणि शंभुना ॥ ९५ ॥
आसां नियामिकानां तु यथालाभं प्रकल्पयेत् ।
पक्षच्छिन्नो भवेन्नूनं ओषध्या पुण्यपाकतः ॥ ९६ ॥

अथान्यमते—

नियामिकां ततो वक्ष्मि सूतस्य मारकर्मणि ।
सर्पाक्षी क्षीरणी वध्या मत्स्याक्षी शंखपुष्पिका ॥ ९७ ॥
काकजंघा शिखिशिखा ब्रह्मदंड्याखुपर्णिका ।
वर्षाभूः कंचुकी मूर्वा माचीकोत्पलाचिंचिकम् ॥ ९८ ॥
शतावरी च द्विलता वज्रकंदादिकर्णिका ।
मंडूकपर्णी पाठाली चित्रको गीष्मसंदरः ॥ ९९ ॥
काकमाची महाराष्ट्री हरिद्रा तिलपर्णिका ।
श्वेताकौं शिग्रुधत्तूरमृगदूर्वा हरीतकी ॥ १०० ॥
गुडूची मुशली पुंखा भृंगराड्रक्तचित्रकम् ।
नारंगं सूरणं मुंडी मलं कापोतकोकिलम् ॥ १०१ ॥
सैंधवं श्वेतवर्षाभू खापरं हिंगुमाक्षिकम् ।
विष्णुक्रांता सोमवल्ली ब्रह्मघ्नी यक्षलोचना ॥ १०२ ॥
व्याघ्रपादी हंसपादी वृश्चिकाली कुतुंबकम् ।
स्वर्यभुक्कुसमं कुंभी हस्तिसुंडींद्रवारुणी ॥ १०३ ॥
बीजीन्यरूष्करस्यापि सर्व एते नियामिकाः ।
एताः समस्ता व्यस्ता वा देया सप्तदशाधिकाः ॥ १०४ ॥
मारणे मूर्छने बंधे रसस्यैता नियोजयेत् ।
अप्रसूतगवां मूत्रैः पिष्टा मूर्वा नियामकाः ॥ १०५ ॥
तद्द्रावैर्मर्दयेत्सूतं यथा पूर्वोदितं क्रमात् ।
इत्येवं जारणायुक्तं मारणं परिकीर्तितम् ॥ १०६ ॥

बीजपूरस्य सद्वृंतं प्रोत्सार्य कुरु रंध्रकम् ।
निरोधकं सलवणं क्षिप्त्वैकं तेन छादयेत् ॥ १०७ ॥
कांजिकेन भृता स्थाली निंबुकानां रसाचिता ।
दोलायंत्रेण तन्मध्ये ब्रुडंतं बीजपूरकम् ॥ १०८ ॥
बध्वा पिधाय सप्ताहं दृढाग्निं ज्वालयेदधः ।
प्रत्यहं मातुलिंगैश्च नव्यैर्भव्यभवन्मुखम् ॥ १०९ ॥
ग्रसते चाभ्रकादीनि सूतेनास्यं प्रसारितम् ।
व्यात्तवक्त्रो ग्रसत्येव क्षिप्तं सर्वं च जीर्यति ॥ ११० ॥

सुनिष्पन्नबीजपूरस्य वृंतमुत्पाट्य मध्ये उत्कीर्य छिद्रं कृत्वा ततो निरोधकं रसं क्षिप्त्वोपरि लवणं मुक्त्वा पुनस्तेन वृंतेन छादयित्वा बीजपूरकं वस्त्रे बध्वा त्रिभागेन निम्बुकरसयुक्तकांजिकभृतस्थाली, मध्ये दोलायंत्रेण पूर्वोक्तेन कांजिके ब्रुडंतं बीजपूरकं धृत्वाऽधोऽग्निर्ज्वालनीयोऽहोरात्रम् । ततः पुनः प्रभाते नवं बीजपूरकमानीय तथैव मध्ये रसं क्षिप्त्वा दोलायंत्रेणाहोरात्रं रसः संस्कार्यः । एवं सप्तभिर्दिनैः सप्तवारं नवनवैर्मातुलुंगैः संस्कृतो रसो धान्याभ्रकादीनां ग्रसनाय प्रसारितमुखो विधिना दत्तं सर्वं ग्रासं जीर्यति ।

इति निरोधकरसस्य मुखप्रसारणसंस्कारो दशमः ॥ १० ॥

अथ जारणम् ।

कर्कोटीफणिनेत्राभ्यां विंचिकांबुजमार्कवैः ।
नियम्योऽसौ ततः सम्यक् चपलत्वं निवर्त्तयेत् ॥ १११ ॥

अन्यमतम्—

मर्दनमूर्छनपातैः कदर्थितो भवति मंदवीर्यस्तु ।
सृष्टयांबुजैर्निरोधात्तलद्वयप्रायो न खंडः स्यात् ॥ ११२ ॥

अन्यमतम्—

इत्थंकदर्थिततनुर्गलितात्मवीर्यः
सृष्टयांचितश्छगणकैः पुटितो वली स्यात् ॥
भूटंकणोषणस्वयासुरिशिग्रुपिष्टैः ।
स्विन्नस्त्र्यहे तुषजलेऽथभवेत्सुदीप्तः ॥ ११३ ॥

त्रिफला चित्रमूलं च सौराष्ट्री नवसादरम् ।
शिग्रुरसेन संभाव्य मर्दयेच्च दिनत्रयम् ॥ ११४ ॥
तेनैव मध्यगं कृत्वा नियम्योऽसौ पुनः पुनः ।
त्रयोदशेऽह्नि संप्राप्ते जायते दीपनं शुभम् ॥ ११५ ॥

अन्यमतम् ।

भूखगटंकणमनःशिलालवणासुरिशिग्रुकांचिकैस्त्रिदिनम् ।
स्वेदेन दीनदीप्तोऽसौ ग्रासार्थी जायते सूतः ॥ ११६ ॥

इति दीप्तो विशुद्धः प्रबलतरविद्युच्छटासहस्राभः सुतरां भवति । रसेन्द्रो द्रव्येऽपि रसायने योज्यः । इति दीपनग्रंथाः ।

व्याप्तास्यं काचकुंप्यंतः सल्लूणं नैम्बुकं रसम् ।
पलं धान्याभ्रकं क्षिप्त्वा लिंपेद्वस्त्रमृदा मुखम् ॥ ११७ ॥
मुखे कोडीयकं दद्यात्कुडीकावालुकाभृता ।
कुपिकां वालुकामध्ये क्षिप्त्वा चोपरि वालुकाम् ॥ ११८ ॥
प्रदायाधोऽष्टयामं च हठाग्निं ज्वालेयत्सुधीः ।
पलं धान्याभ्रकं चैकं जारणीयमहर्निशम् ॥ ११९ ॥
सूतादष्टगुणं जार्यं धान्याभ्रं रसवेदिना ।
नाम्नासौ गगनग्रासः पारदः परिकीर्त्तितः ॥ १२० ॥

काचकुंपिकामध्ये प्रसारितमुखं रसं पलमेकं मध्ये मुक्त्वा कुंपिकामुखे चातिकां दत्वोपरि कर्पटमृत्तिकया लिप्त्वा शोषयेत् । तत पृथुलमुखायां कुण्डिकायां वालुकां क्षिप्त्वोपरि अंगुल ४ । ५ प्रमाणां धूलिं दत्वा कुण्डिकाया अधोऽष्टयामान् हठाऽग्निं ज्वालयित्वा धान्याभ्रकपलं जारणीयम् । अत्र त्वयमाम्नायः । कुण्डिकायां तथा वालुका क्षेप्या यथा तस्या उपरि कुंपिकायां मुक्तायां तदुपरि अंगुल ४ । ५ प्रमाणायां वालुकायां क्षिप्तायां कुण्डिका पूर्णा भवति । तथा रसपल ६४ लवणपल २ धान्याभ्रकपल १ इति मात्राप्रमाणम् । ततस्तां कुंपीं भंक्त्वा रसं गृहीत्वा पुनरपि द्वितीय कुंपिकायां रसधान्याभ्रक लवणनिंबुकरसान् क्षिप्त्वा पूर्ववदहोरात्रं हठाग्निज्वालनेन धान्याभ्रकपलं जारणीयम् । एवमष्टभिर्दिनैरष्टभिः कुपिकाभिरष्टधान्याभ्रकपलानि जारणीयानि । ततोऽसौ गगनग्रासनामा पारदः प्रोच्यते ।

एकपत्रीकृतं सर्वमभ्रकं तदनंतरम् ।
तप्तखर्परविन्यस्तं प्रदहेत्तीव्रवह्निना ॥ १२१ ॥
अगस्तिपुष्पतोये च कुमुदानां रसेन च ।
वर्षाभूतुंदलीयेन मरिचैः सुमुखेन च ॥ १२२ ॥
माहिषेणैव दुग्धेन सारयित्वाऽभ्रकं ततः ।
यवविच्चिकतोयेन प्लावयित्वा पुटे पचेत् ॥ १२३ ॥
मरिचासुरसिद्धार्थविषचूर्णैश्च सूतकम् ।
स्वेदयेत्कांजिके बद्धं दोलायां दिवसत्रयम् ॥ १२४ ॥
एवं स्विन्नो रसः पश्चात्कांजिके यवविच्चिकाम् ।
समूलपत्रां संकुट्य संधयित्वा विचक्षणः ॥ १२५ ॥
कांजिके जायते देव्यरसबंधे तु नित्यशः ।
हेमा क्रिया हेममुखे तारे तारमुखं कृतम् ॥ १२६ ॥
यवविच्चिकतोयेन स्वेदयन् स्वेदयेद् बुधः ।
लोहाग्रेभ्रमथो शालमुदग्धं वर्षयेत्तथा ॥ १२७ ॥
जीर्णस्य लक्षणं ज्ञेयं जलौकादंडधारिणः ।
द्वितीये काकविष्ठाभं तृतीये तैलको भवेत् ॥ १२८ ॥
कपिलोथ निहृद्वारो विप्रुषो नैव मुंचति ।
अग्नौ हि घ्रातनिक्षस्थो व्योमजीर्णस्य लक्षणम् ॥ १२९ ॥
अथ वैकृतकस्पर्शाद्दिव्यौषधिमुखं प्रति ।
अथ ह चरति क्षिप्रं क्षणादेव निबध्यते ॥ १३० ॥
ततो लोहकपालस्थं स्वेदयेन्मृदुवह्निना ।
सुखोष्णेनारनालेन प्रक्षालितरसं बुधः ॥ १३२ ॥
एवमभ्रकजीर्णस्य रसस्याष्टमभागतः ।
विडं दद्याच्च विधिवज्जारयेत्तं विचक्षणः ॥ १३३ ॥
एवं षड्गुणजीर्णं तु सूतकं जारयेत् बुधः ।

अथ धान्याभ्रकलक्षणमाह—

भूमौ लगति यत्क्षिप्रं तद्धान्याभ्रकमुच्यते ।
अभ्रके द्विगुणे जीर्णे धूमव्याजेन गच्छति ॥ १३४ ॥
जीर्णे चतुर्गुणे तस्मिन् गतिशक्तिर्विहन्यते ।
उत्प्लुत्योत्प्लुत्य बाह्ये च मूषायाः पतति ध्रुवम् ॥ १३५ ॥
जीर्णे च षड्गुणे सूतं कंपतेऽसौ मुहुर्मुहुः ।
बाह्ये चोड्डीय नो याति स्थितः स्थाने स्थिरायते ॥१३५॥
तस्मिन्नष्टगुणे जीर्णे ध्मातं शाम्यति पारदः ।
हठेन वह्निनाध्मातः स्थिरीभूतसुवर्णवत् ॥ १३६ ॥
रूप्यगद्याणकयाचोह्यनेनाभ्यंज्य गालिते ।
दशवर्णं भवेद्धेम कथितं रसवेदिभिः ॥ १३७ ॥

अत्राम्नायः । पूर्वमभ्रकैरखंडव्रीहिभिः श्लक्ष्णपाषाणकर्करैर्वादृढन-हीनवस्त्रको थलिकां भृत्वा द्वारं दवरकेण दृढं बध्वा काष्ठपत्रिकायां जलपूर्णायां मुक्त्वा गाढं तथा मृद्दनीयो यथाभ्रकं चूर्णीभूय किंचि-द्बहिर्निःसरति । तच्च शोषयित्वा श्लक्ष्णचूर्णं गृह्यते । इदं च भूमि-कायां क्षिप्तं सूक्ष्मत्वात्तत्र लगति । रसज्ञास्त्वेतं धान्याभ्रकं वदंति । तथो पारदाद्विगुणे धान्याभ्रकेण जीर्णेऽग्निं तापयेत्ततो रसो धूमेन कृतोड्डीय याति । चतुर्गुणे धान्याभ्रके जीर्णे धूमरूपेण न याति । किंतु हठाग्नियोगे मूषायामुड्डीय बहिः पतति । षड्गुणे धान्याभ्रके जीर्णे बहिरुड्डीय न याति । किंतु मूषामध्ये कंपते । अष्टगुणे जीर्णे हठेन ध्मातो हि सुवर्णवत् स्थिरीभवति न पुनः पुनर्मनागपि कंपते । ततो महाग्निसहेन तेन रसेन रूप्यगद्याणकपत्रमभ्यंज्य गाल्यते । तदा दशवर्णं सुवर्णं सुवर्णं भवति ।

इति प्रसारिते मुखस्य रसस्य गगनग्रासजारणं प्रथमम् ।

अभ्रकस्य च पत्राणि श्लक्ष्णचूर्णीकृतानि च ।
कर्पासीरसतोयेन मर्दितानि दिनत्रयम् ॥ १३८ ॥
मातुलिंगकनकस्यापि वार्कतोयेन मर्दयेत् ।
क्षिप्त्वा टंकणक्षारं च नवसारं तथैव च ॥ १३९ ॥

खल्वमध्ये ततः क्षिप्त्वा मर्दयेत्प्रतिवासरम् ।
रसैः पूर्वोदितैर्भूयो यावतद्विलते स्फुटम् ॥ १४० ॥

अथ ग्रंथांतरे—

यवाख्याकदलीशिग्रुचिंचाफलपुनर्नवा ।
शतमूलै रसैरभ्रं भावितं मुनिसंख्यया ॥ १४१ ॥
तद्भासंरसराजोऽसौ सुखं भुक्ते वरे मुखे ।
संजाते देहसिद्ध्यर्थं धातुसिद्ध्यर्थमेव हि ॥ १४२ ॥
स्वल्पमप्यभ्रकं सूतो यदि गृह्णाति चेत्सुखम् ।
बध्यते स्वगृहांतस्थो यथा चौरोऽति चंचलः ॥ १४३ ॥

अथान्यमतम्—

कुमारी कदली वज्री जारी हेमपदी नटी ।
वृहती चाग्निदमनी लांगली समभागतः ॥ १४४ ॥
पत्राभ्रमभ्रचूर्णं वा (वन्यं) मलनीगुणभावितम् ।
तप्तेन लोहचूर्णेन पिष्टिः स्यान्मर्दने रसे ॥ १४५ ॥

अभ्रपीठी—

लोहखल्वे चतुष्पादे सूतग्रस्ताभ्रकं क्षिपेत् ।
चतुःषष्ट्यंशभागेन चूर्णं कांतायसं रसात् ॥ १४६ ॥
कांजिकेनैव संदाष्टं बव्वेरं यच्च थूथकम् ।
तत्तथा वै बिडं प्रोक्तं चंदनं रसवेदिभिः ॥ १४७ ॥
थूथाबिडेन संपिष्णन् मृद्वग्निं ज्वालयेदधः
सूतादष्टगुणं लोहं जारणीयं सदा बुधैः ॥ १४८ ॥
अग्नौ कांतलोहस्य चूर्णं तीक्ष्णस्य संक्षिपेत् ।
चतुःषष्टितमं चांशं जीर्णे जीर्णे क्षिपेन् मुहुः ॥ १४९ ॥
सूतोऽसौ जीर्णलोहः सन् गोधूमाभः कषागतः ।
पाशितो रागसहनो जातो रागश्च जीर्यति ॥ १५० ॥

यस्मिन् लोहखल्वे चत्वारः पादा मंचिकयाभिभवंति स चतुष्पाद उच्यते। तस्मिन् लोहखल्वे ग्रस्ताभ्रकसूतं तथा चतुःषष्टितमेन सूतकस्य कांतलोहचूर्णं क्षिप्त्वा यथा बिडेन सह लोष्टिकया मंदं मंदं मंदं मर्दयेत्। अधश्च कोमलाग्निर्ज्वालयेत्। एवं कुर्वता यदि कांतलोहचूर्णचतुःषष्टितमो जीर्णो भवति तदा पुनरपि चतुःषष्टितमभागेन कांतलोहचूर्णं क्षिप्त्वा थूथाबिडेन पेषणीयम्। अधश्चाग्निर्ज्वालनीयः। एवं पूर्वक्षिप्ते लोहचूर्णे जीर्णे पुनःपुनस्तावच्चतुःषष्टितमांशेन लोहचूर्णं क्षेप्यम्। यावत् सूतादष्टगुणलोहचूर्णे जीर्यति। इत्यर्थं लोहचूर्णस्य कषायेण रसः पाशितः सन् गोधूमवर्णो भवति। तथा रागांश्च सहते। अथ प्रकाशादिकराजिरागाश्च जीर्यति। अत्र च यदि कांतलोहं न लभ्यते तदा तीक्ष्णायसं सारलोहच्। तथायत्बघेरंथूथकं तत् कांजिकेन संघृष्य चंदनं क्षिप्यते। एतत्थूथाबिडमित्युच्यते। अग्रेऽपि सर्वत्र थूथाविडे शब्देनेदमेव ज्ञेयम्।

इतिग्रस्ताभ्रकसूतस्यलोहजारणं द्वितीयम् ॥ २ ॥

लोहखल्वे चतुष्पादे जीर्णलोहं रसं क्षिपेत्।
अयः प्रकाशे राजेश्च चतुःषष्ट्यंशचूर्णकम् ॥ १५१ ॥
थूथाबिडेन संपिष्य मृद्वग्निर्ज्वालयेदधः।
सूतादष्टगुणा जार्या राजिश्चायःप्रकाशिका ॥ १५२ ॥
अयःप्रकाशराजौ च जीर्णायां पीतता भवेत्।
रक्ततापादनार्थं च हिमराजिं च जारयेत् ॥ १५३ ॥

पूर्वोक्ते च चतुष्पादे लोहखल्वे जीर्णलोहं रसं तथा। चतुःषष्टितमभागेन अयःप्रकाशिराजिचूर्णं च क्षिप्त्वा पूर्वोक्तेन थूथाबिडेन मर्दयेत्। अधश्च कोमलाग्निर्ज्वालयेत्। अग्रेतनक्षिप्तायःप्रकाशं चूर्णं च जीर्णे पुनस्तावन्मात्रमयः। एवं च यदि रसादष्टगुणायःप्रकाशराजिजीर्णा भवति। तदा सूतः पीतो भवेत्। ततः सूतस्य रक्तानिमित्तं वक्ष्यमाणरीत्या हेमराजिं जारयेत् ॥

इति जीर्णलोहसूतस्यायः प्रकाशराजिजारणं तृतीयम् ॥
राजिस्वरूपं चांग्रे स्वयं स च व्याख्यास्यति ॥

लोहखल्वतुष्पादे संजीर्णायःप्रकाशिकम्।
पारदं हेमराजेश्च चतुःषष्ट्यंशचूर्णकम् ॥ ५३ ॥

थूथाबिडेन संपिष्य मृद्वग्निं ज्वालयेदधः ।
सूतादष्टगुणा जार्या हेमराजिश्च कोविदैः ॥ ५४ ॥
जीर्णायां हेमराजौ च रक्तता जायते ध्रुवम् ।
स्वर्णस्योत्पादनार्थं च जार्यः शुद्धो हि गंधकः ॥ ५५ ॥

यथा अयःप्रकाशराजिर्जारणा तथाहेमराजेरपि जारणा ज्ञेया । पारदादष्टगुणा च शेषं स्पष्टम् ।

इति जीर्णायःप्रकाशकराजिसूतस्यहेमराजिजारणं चतुर्थम् ।

लोष्टगर्त्तः सुधालिप्तश्चूर्णेन मगुडेन वा ।
गाढं लिप्तस्वसंशुष्को यंत्रोऽयं भूधरो मतः ॥ ५६ ॥
जीर्णहेमाख्यराजिश्च सूतं यंत्रे च भूधरे ।
क्षिप्त्वा वै षोडशांशेन शुद्धगंधकचूर्णकम् ॥ ५७ ॥
मुखे कोडीयकं दद्यादधोवक्त्रं पिधानके ।
वस्त्रमृत्तिकया लिंपेत् हठाग्निं ज्वालयेत्तथा ॥ ५८ ॥
षोडशांशं मुहुर्दद्यात् मुहुः कोडीयकं तथा ।
पारदात् षड्गुणो यावज्जीर्यते शुद्धगंधकः ॥ ५९ ॥
भवेद् दार्ढ्यं च रागेन जीर्णे सूतेन गंधके ।
रुप्यं ताम्रं तथा लोहं वंगं नागं च पित्तलम् ॥ ६० ॥
कांस्यं च सप्तलोहानि रसेनाभ्यंज्य गालयेत् ।
तिथिवर्णं भवत्येवं सुवर्णं नैव संशयः ॥ ६१ ॥

इह कूपवह्नोष्ठबंधः कांचिकहस्तमानो गर्त्तः सुधाया छोहया लिप्तो यदि वागुडं सहितेन चूर्णेन लिप्तः शुष्कः सन् । भूधरनामायं यंत्रः प्रोच्यते । ततः काचलिप्तमृत्तिकाकाश्यं शरावे जीर्णं हेमराजिं सूतं तथाषोडशभागेन शुद्धगंधकचूर्णं च क्षित्वोपरि मुखकाचलिप्तमृत्तिकाकोडीयकं दत्वा कर्पटमृत्तिकया लिप्त्वा तं शरावं सम्पुटं भूधरयंत्रमध्ये मुत्क्वा हठाग्निर्ज्वालनीयः । शुद्धं गंधकस्वरूपं च गुरुमुखादवज्ञेयम् । यतः सर्वस्मिन्नप्यत्र ग्रंथेऽन्यत्रापि च शुद्धगंधक एव कांचनसि द्धिमूलबीजम् । अत एव सर्वत्र गंधकशुद्धियुक्तिर्गोपितेति

ज्ञेयम् । सदोषे च गंधके जारिते न कार्यसिद्धिरिति तु गुरुमुखाद्गन्धकशुद्धिरवगंतव्या । तथा पूर्वक्षिप्तगंधकषोडशभागे जीर्णे पुनः कोडीयकमूछार्याशुगंधकषोडशभागं क्षिप्त्वा कोडीयकं दत्वा हठाग्निर्ज्वालनीयः । एवं च रसात् षड्गुणशुद्धंगंधके जीर्णेऽतीवरक्तः पारदो भवति । तेन च रसेन रुप्यं ताम्रं लोह वंगं नागं पित्तलं कांस्यं चेति सप्त लोहानि अभ्यंग्य गालितानि पंचदशसुवर्णानि भवंति ।

इति जीर्णहेमराजिसूतस्य गंधकजारणं पञ्चमम् ।

खटिका १लवणं२ तूरी२ गैरिकधातु४ जीककम्५ ।
संशोधने सुवर्णस्य त्विमाः स्युः पंच मृत्तिकाः ॥ ६२ ॥
प्रक्षिप्य भूधरे यंत्रे पारदं जीर्णगंधकम् ।
क्षिप्त्वा मनःशिलासत्त्वं सूतात् द्वात्रिंशदंशकम् ॥ ६३ ॥
मुखे कोडीयकं दद्यादधोवक्त्रे पिधानकम् ।
वस्त्रमृत्तिकया लिंपेत् हठाग्निं ज्वालयेत्ततः ॥ ६४ ॥
जीर्णे जीर्णे मुहुर्दद्याद्यक्तांशं सूतशोधकः ।
सूततुल्यं त्विदं जार्यं न तु हीनं न चाधिकम् ॥ ६५ ॥
जीर्णे मनःशिलासत्त्वे पंच वक्ष्यामि मृत्तिकाः ।
दार्वीछेद२कषा३वर्त्त४शोधने हेमशुध्यति ॥ ६६ ॥

इह खटिका । लवणम् । तूरी । गैरकवर्णिकाजीकक इत्येताभिः पंचभिर्मृत्तिकाभिः परिक्षकाः कनकं परीक्ष्यं तेन यथा । कनकपत्राणि कांजिकेन क्लेदयित्वा रजकत्यक्ततूरीशुष्कलगदकं लवणेन समभोगेन चूर्णयित्वा कर्परो परिचूर्ण तदुपरि पत्रं पुनश्चूर्णं पुनपत्रमेवं पत्राण्युपर्युपरिमुत्क्वोपरि पुनः कर्परं दत्वा चूर्णेन सर्वतः पार्श्वे वा छाद्ययावद्भिः कर्परपुट आच्छाद्यते तावन्ति छगणकानि खडकित्वाग्निं दत्वा मुच्यते यदि च ज्वलित्वा स्वयं तिष्ठति । तदा पुनर्द्वितीयवारं छगणखण्डकनपूर्णः पुटो देयः । एवं यदि मलाधिक्यं तदा तृतीयो देयः । एवं चित्रक्षटखटिकयापि गोलकखटिकया वा लवणामिश्रयापि पुटद्वयत्रयदानेन तदेव कार्यम् । अथ यद्येव ज्ञायते । एवं कृतेऽपि सर्वथा न शुद्धं द्रव्यं यदि वावद्गूलोतादिकुधातुमसाधिक्यं तदामसवारवर्णिकया जीककेण वालवणमिश्रेण पूर्ववरीत्यैव पुटद्वयत्रयदाने सर्व-

मलशुद्धिः। इति पंचमृत्स्नाभिः सर्वदोषशुद्धिः। तथा चतुर्दशवणिकादशीकादशयनबाश्चेति संप्रतिकले स्वर्णपरमसीमा अतः परं शोधनेपि कृते न हि कर्णिकावृद्धिः। तथा शोधनचूर्णं यदि ध्मायते तदा यो रूप्यादिधातुश्चीर्णो भवति सोपि लभ्यते। तथा रूप्यं कर्परे क्षिप्त्वोपरिसीसकं क्षिप्यतेऽधो जाल्यते ततो द्वावपिसरावेदाकत्रभूत्वाभ्रमतस्तदावसीसकरजतमलं त्यक्त्वा कर्परलगितागरणरक्षांगुलप्रमाणश्चरमध्ये मिलति। शुद्धरूप्यरसश्च यदि भ्रांतस्तिष्ठति तदा ज्ञेयं शुद्धो रूप्यरसः। रक्षायां ध्मातायां चीर्णतामृदिधातवो लभ्यन्ते। इत्यादिविज्ञमुखैर्ज्ञेयम्। अथ मूलग्रन्थव्याख्या। भूधरयन्त्रे शरावसंपुटे जीर्णं गन्धकं रसं क्षिप्त्वा द्वात्रिंशत्तमेन मनःशिलासत्त्वं च क्षिप्त्वा मुखे कोडीयकं दत्वा कर्पटमृत्तिकया च लिप्त्वा दृढाग्निं ज्वालयेत् जीर्णे च मनःशिलासत्त्वे पुनर्द्वात्रिंशत्तमेन भागेन तस्य क्षेपः। एवं पुनः पुनः क्षेपणसूततुल्यं मनःशिलासत्त्वं जार्यम्। न हीनं न चाधिकम्। एवं मनःशिलासत्त्वे जीर्णे पारदेन समलोहान्यभ्यंगगालितानि हेमरूपाणि भवन्ति। तच्च हेमपञ्चभिर्मृत्तिकाभिः शोधनिकां सहते। तथादाद्यछेदकषावर्त्तशोधनशुद्धं च जायते।

इति जीर्णगन्धकसूतस्य मनःशिलासत्वजारणं षष्ठम्।

एतावद्भिः संस्कारैः संस्कृतो रसो लोहसाधक एव। अतः परं च ये संस्कारा यानि च जारणानि तानि देहलोहसाधकानीति।

तत्र सप्तमं खापरसत्वजारणमाह।

सूतं जीर्णशिलासत्त्वं लोहखल्वे चतुष्पदे।
क्षिप्त्वा खापररसत्त्वस्य चतुःषष्ट्यंशचूर्णकम् ॥ ६७ ॥
थूथाबीडेन सम्पिष्य मृद्वग्निं ज्वालयेदधः।
जीर्णे जीर्णे मुहुर्क्षिप्त्वा जार्यमष्टगुणं रसात् ॥ ६८ ॥
जीर्णे पुष्पाक्षसत्त्वे च सस्नेहो जायते रसः।
जीर्यतेऽपथं वक्त्रं सम्प्रत्यूर्ध्वं च पारदः ॥ ६९ ॥

चतुःपादे लोहषइरलेषापरसूत्वं तस्माच्चतुःषष्टिगुणं जीर्णमनःशिलासत्त्वं पारदं च क्षिप्त्वा थूथाबिडेन संपिष्यन्नधो मृद्वग्निं ज्वालयेत्। अत्रतने च खापरसत्त्वे जीर्णे पुनः ६४ भागेन तदेव क्षेप्यम्। एवं

पुनः पुनः क्षिप्त्वा रसादष्टगुणं खापरसत्वं जारणीयम् ॥ ततः पारदः सस्नेहो भूत्वा संग्रस्त्यूर्ध्वमन्नपथहीरकं जीर्यति ।

इति जीर्णशिलासत्त्वस्य तस्य खापरसत्वजारणं सप्तमम् ।

त्रिधान्नपथवक्राणां मध्यादेकं च हीरकम् ।
येन सूतेन संजीर्णं सत्वं पुष्पाक्षसंभवम् ॥ ७० ॥
प्रक्षिप्य लोहसत्वे तौ चतुष्पाद उभावपि ।
थूथाबिडेन संपिष्यन्मृद्वग्निं ज्वालयेदधः ॥ ७१ ॥
ज्वाल्योऽग्निस्तावता यावज्जीर्यते स च हीरकः ।
हीरकेन्नपथे जीर्णे सर्वव्यापी भवेद्रसः ॥ ७२ ॥

इलाग्रे त्रिभिः प्रकारैरन्नपथहीरकाणां निष्पत्तिं भणिष्यति । ततस्तेषां प्रकारत्रयाणां मध्यात्प्रथममेकतमेन प्रकारेण निष्पन्नमन्नपथहीरकभस्म तथा जीर्णखापरसत्वं सूतं चोभावपि चतुःपादे लोहखल्वे क्षिप्त्वा थूथाबिडेन पिषन् खरलाधो भागे कोमलाग्निं ज्वालयेत् । तावत् यावता सर्वं हीरकभस्म जीर्यति । ततो हीरके जीर्णे सति रसः सर्वव्यापीति देहलोहव्यापको भवति ।

इति जीर्णषापरसत्वसूतस्यान्नपथहीरके जारणमष्टमम् ।

एवंभूतस्तु सूतोयं रौद्रसंहारकारकः ।
यत्किंचिद्दीयते तस्य रसोपरसवातकः ॥ ७३ ॥
तत्सर्वं ग्रसते वेगात् यथा देवो महेश्वरः ।
क्षणेन जायते जीर्णं तन्मुखे पतितं तु यत् ॥ ७४ ॥
स्फाटिकांतानि रत्नानि जीर्यंते चातिवेगतः ।
ततः कोटिगुणे जीर्णे शंखवेधी भवेद्रसः ॥ ७५ ॥
तत् क्षणादमरत्वं च खेचरत्वं ददाति च ।

अथान्यमते—

अजीर्णं तुंबावीजं तु सूतकं यस्तु वातयेत् ।
ब्रह्महा स दुराचारो मम द्रोही महेश्वरि ॥ ७६ ॥
तस्मात्सर्वप्रयत्नेन जारितं मारयेद्रसम् ।
संस्थाप्य गोमयं भूमौ पश्चात् मूषां तदोपरि ॥ ७७ ॥

तन्मध्ये कटुतुंब्योत्थं तैलं दत्वा रसं क्षिपेत् ।
काकमाचिरसो देयस्तैलतुल्यस्ततः पुनः ॥ ७८ ॥
गंधकं व्रीहिमात्रं च क्षिप्त्वा तं च निरोधयेत् ।
तत्पृष्ठे श्रावकं दत्वा पूर्णतावद्भिषक् परम् ॥ ७९ ॥
स्वांगशीतं च तं ज्ञात्वा जीर्णं तैलं च गंधकम् ।
काकमाचिद्रवं चाग्निं दत्वा दत्वा तु जारयेत् ॥ ८० ॥
मूषायां गोमयं सार्द्रं दत्वा चाधोऽथ पावकम् ।
षड्गुणं गंधकं जार्यं मृतस्यैवं मुषं भवेत् ॥ ८१ ॥
तन्मृतं मर्दयेत् खल्वे जंबीरोत्थद्रवैर्दिनम् ।
चतुःषष्ट्यंशकं पूर्वं द्वात्रिंशांशं ततः पुनः ॥ ८२ ॥
षोडशांशं शुद्धहेमपत्रं मृतेषु जारयेत् ।
साग्रे साग्रे तु तन्मर्द्यं जंबीराणां द्रवैर्दृढम् ॥ ८३ ॥
मूलिका लवणं गंधमभावे पित्ततैलयोः ।
पिष्ट्वा जंबीरनीरेण हेमपत्रं प्रलेपयेत् ।
इत्येवं जारणा कार्या ततः मूतं विमारयेत् ॥ ८४ ॥

अन्यमते—

अथ वा निर्मुषं चेमं बिडयोगेन जारयेत् ।
बिडमत्र प्रवक्ष्यामि साधयेद्भिषगुत्तमः ॥ ८५ ॥
शंखचूर्णं रविक्षीरैरातपे भावयेदिनम् ।
तद्वज्जंबीरजैर्द्रवैर्दिनैकं धूमसारकम् ॥ ८६ ॥
सौवर्चलमजामूत्रैः क्वाथं यामचतुष्टयम् ।
कंटकारीरसं क्वाथं दिनैकं नरमूत्रके ॥ ८७ ॥
साजीक्षारं च काशीसं तिंतिणीकं शिलाजतु ।
जंबीरोत्थद्रवैर्भाव्यं पृथक् यामचतुष्टयम् ॥ ८८ ॥
जेपालबीजं त्वकहीनं मूलकानां द्रवैर्दिनम् ।

सैंधवं टंकणं गुंजा शिग्रुमूलद्रवैर्दिनम् ॥ ८९ ॥
एतत्सर्वं समांशं तु मर्द्यं जंबीरजैर्द्रवैः ।
तद्गोलं रक्षयेद्यत्नात् बिडोऽयं वडवानलः ॥ ९० ॥
अनेन मर्दयेत्सूतं ग्रसते तप्तखल्वके ।
स्वर्णाभ्रसर्वलोहानि सत्त्वानि ग्रसते क्षणात् ॥ ९१ ॥

अथान्यमते बिडानि ॥

अथ जार्यवस्तूनां जीर्णाजीर्णत्वज्ञानोपायमाह—

आद्यो गर्भपरः पिंडः परिणामस्तृतीयकः ।
सूतांतः सर्वजार्याणां जारणास्त्रिविधो विधिः ॥ ९२ ॥
जार्ये तु जारिते सूते वस्त्रेण गालिते सति ।
वस्त्रे तिष्ठति चेत् सर्वमाद्यो वै गर्भसंज्ञकः ॥ ९३ ॥
पुनर्जारितजार्ये तु वस्त्राज्जिशेषनिर्गते ।
ख्यातोऽल्पादधिके सूते सोपरिपिंडसंज्ञकः ॥ ९४ ॥
जालं कारयता सूते वस्त्रान्निःसरते पुनः ।
संस्थिते च निजे तौल्ये जीर्णजार्यस्तृतीयकः ॥ ९५ ॥

अत्राप्ययमाम्नायः ॥ इहानंतरप्रोक्तं धान्याभ्रकादीनां...स च...तमेष्वन्येषु वस्तुषु रसे जारितेषु ससूतकं जीर्णमजीर्णमेवेति विचारः । प्रथमो गर्भः द्वितीयः पिंडस्तृतीयः परिणामक इति त्रिविधं लक्षणं भवति । तद्यथा जार्यं वस्तु जारयित्वा रसो वस्त्रेण गाल्यते ततो यदि किंचिद्वस्त्रे शेषं विगाल्य तिष्ठति तदा ज्ञेयोऽसौ गर्भ इति । ततः पुनरपि सरश्चरुभ्यते(?) तदेव खरले क्षिप्त्वा यथा बिडेन पेषिताग्निर्ज्वालनीयः । अयं भावो जारणा येन विधिना पूर्वं भणिताऽस्ति सा तेन विधिना जार्यौषधं विनैवानुमानेन तप्त्वा पुनर्वस्त्रेण रसो गालनीयः । ततो यदि वस्त्रात् पूर्वोपि निस्सरति ननु किंचिल्लगति परं तोलितः स तु निजतौल्याधिको भवति तदा ज्ञेयोऽसौ पिंड इति । अद्यापि सर्वथा न जीर्णमौषधमित्यर्थः । ततः पुनरपि यथा भणितास्ति तथैव जार्यौषधोपक्षेपेण विनैव विधापुनर्नववस्त्रेण रसो गाल्यते । यदि वस्त्रान्निःसृतो गालितः सन्निजतौल्ये तिष्ठति तदा ज्ञेयोऽसौ परिणा-

मक इति । रसेनौषधसर्वथाजीर्ण इत्यर्थः । अत्राद्यमेतद्वयमेव शुद्ध-कृतो यो भेदः शुद्धः ।

इति जार्याणां जीर्णलक्षणाधिकारः । इति सारणसमाप्तः ।
इत्येवमष्टभिः संस्कारैरेकादशो जारणासंस्कारः ॥ ११ ॥

कुंभस्याधः कृते छिद्रे द्विग्रंथिं दोरकं क्षिपेत् ।
एकं मध्ये परं बाह्ये कुंभे कार्यो गलद्घटी ॥ ९६ ॥
महोडाकस्य मूलानां श्रीखण्डेन घटे ततः ।
क्षिप्त्वायःस्थालिकामध्ये पारदं जीर्णहीरकम् ॥ ९७ ॥
सच्छिद्रां ढंकणीं दत्वा कुंभं श्रीखंडसंभृतम् ।
प्रध्वरायां च ढंकण्यां क्षिप्त्वाग्निं ज्वालयेद् हठात् ॥ ९८ ॥
स्थालिकाधश्चतुर्यामं ढंकणीछिद्रमध्यतः ।
श्रीपिंडो दोरकाच्च्युत्वा मुहुः पतति पारदे ॥ ९९ ॥
तद्दग्धसूतसंमिश्रं श्वेतभस्म प्रजायते ।
तत् क्षिपेद्धमूषायां साकं मध्वाज्यटंकणैः ॥ १०० ॥
ध्मातं सत्कुरुते बंधं पारदस्य न संशयः ।
न क्षीयते मुहुर्ध्मातेऽतीवनिश्चलतां गतः ॥ १०१ ॥
जार्यमाणश्च यः सूतः स्वयमेव निबध्यते ।
स हि सिद्धरसानां हि देहलोहो निबध्यति ॥ १०२ ॥

इह कुम्भस्य तले छिद्रं अंगुलिप्रवेशयोग्यं कृत्वा तत्र दवरकं क्षिप्त्वा मध्ये बहिरपि च दवरके ग्रंथिं दत्वा तथा कार्यं यथा सत्कुंभो गलद्घटी भवति । तत्र क्षिप्तौषधरसो गलतीत्यर्थ । ततः स्थालिकामध्ये जीर्णदोरकं पारदं क्षिप्त्वा उपरि सच्छिद्रा प्रध्वरा ढंकणी दीयते । तस्याश्चोपरि गलद्घटी कुंभोमुमुत्का(?)महोडाकमूलानां श्रीषंडेन सकुम्भो भ्रियते । ततः स्थालिकाया अधस्ताच्चतुरो यामान् हठाग्निर्ज्वालनीयः । एवं च यथायथा कुंभमध्यात् ढंकणी छिद्रेण दवरकाद् गलित्वा तुषरसः पारदे पतति तथातथाऽग्निदग्धः पारदः श्वेतभस्म भवति । ततश्च तत्सूतभस्म मध्वाज्यटंकणैः साकं बंधमूषायां क्षिप्त्वा ध्मायते । ततः पारदो ध्मातः सन् बध्यते । कोऽर्थः ? अनेक-

शोऽत्यर्थं ध्मातोऽपि निश्चलो भवति न पुनः क्षीयते। यः पारदो जार्यमाणः सन् बध्यते स्वयमेव निबध्यते निरायासबद्धो भवति स हि सिद्धरस इत्युच्यते । स च देहलोहानां वेधकः स्यात् । तदेदं पूर्वोक्तयुक्तयासौ सिद्धरसो निष्पन्नः ॥

अथ सिद्धरसस्य फलमाह—

मृगस्याकृष्णनेत्रे च प्ररोहत्यंधचक्षुषि ।
रसाभ्यक्ते तयोः पीडा नश्यत्यंधश्च पश्यति ॥ १०३ ॥
देवदानवगंधर्वसिद्धगुह्यकखेचरैः ।
रसो वक्त्रे स्थितो यस्य तद्गतिः खे न हन्यते ॥ १०४ ॥
म्रियते न विषेणापि दह्यते नैव वह्निना ।
आकाशे सिद्धविद्यस्य मृतो जीवति तत्क्षणात् ॥ १०५ ॥
मणिमंत्रौषधेभ्योऽपि प्रभावातिशयो महान् ।
मृतसंजीवनो नाम रसबंधः प्रकीर्त्तितः ॥ १०६ ॥

मृगस्य नेत्रे अकृष्णरसेनाभ्येते। नेत्रयोः पीडा नश्यति । अंधचक्षुषि सिद्धरसांजने कृतेऽन्धः पश्यति। तथा यस्य मुखे सिद्धरसगुटिका तिष्ठति तस्याकाशे गतिर्देवदानवगंधर्वसिद्धयक्षखेचरैर्न हन्यते । तथा सिद्धरसे मुखे स्थिते विषेण न म्रियते । अग्निना न दह्यते । आकाशे सिद्धरसविद्यश्च भवति । मृतो मूर्छितः सन् तत्क्षणाज्जीवति। तथा मणिमंत्रमहौषधेभ्योऽपि सिद्धरसस्य प्रभावातिशयो महीयान्। असौ मृतजीवनो नाम रसबंधः कथितः । कोऽर्थः ? मृत इव मृतः । सर्पदंशवह्निदाहजलप्लावशस्त्रघातविषादिदुष्टप्रयोगैर्मूर्छितः यः केनापि जीवयितुं न शक्यते सोऽपि मुखे क्षिप्तस्यास्य रसस्य प्रभावेण क्षणादेव जीवति ॥

इति जीर्णवज्रसूतस्य बंधसंस्कारो द्वादशः ॥ १२ ॥

बद्धसूतचतुःषष्टिपलान्यावर्त्तयेत्सुधीः ।
हेमरात्रिचतुःषष्टिपलान्यावर्त्तयेत्पृथक् ॥ १०७ ॥
ढालयेद्धेमरात्रिं तां बद्धसूतद्रवोपरि ।
रक्तषोटो भवत्येवं संस्कारः सारणो मतः ॥ १०८ ॥

पूर्वोक्तयुक्त्या बद्धसूतस्य चतुःषष्टिपलानि गालयित्वा ततो द्वितीयमुषायां हेमराजिचतुःषष्टिपलानि गालयेत् । ततस्तानि हेमराजिचतुःषष्टिपलानि गालितबद्धसूतचतुःषष्टिपलोपरि ढालनीयानि । तत उभयं मिलित्वा रक्तषोटो भवति। एवमेष सारणसंस्कारः प्रोच्यते ॥

इति बद्धसूतस्य सारणसंस्कारस्त्रयोदशः ॥ १३ ॥

तारमध्यगतं कृत्वा पूर्ववत्पातयेद्रसम् ॥
हेमपिष्टानुसंपिष्टं कुमारीरसमर्दितम् ॥ १०९ ॥
उपरिस्थस्य भांडस्य बुध्नसंलेपितं ध्रुवम् ॥
एवं तु गंधकं ताम्ररजते हाटके तथा ॥
पुनः पुनस्तथा पात्यं चेत्थं संसारयेत्ततः ॥ ११० ॥

इति सारणविधिः ॥

रक्तषोटस्य यावंतो गद्याणाः सारणे कृते ।
द्विघ्नाः शुद्धशिलायास्ते भृशं चूर्णीकृता मुहुः ॥ १११ ॥
विस्तीर्णकाचकूप्यां तद् देयं चूर्णमुपर्यधः ।
रक्तषोटं च तद्गर्भे क्षिप्त्वास्य चाभ्रचाचिकम् ॥ ११२ ॥
कूपिकायां वेष्टनानि सप्त देयानि च मृदः ।
नरप्रमाणिकं गर्त्तं खनित्वा छणकैर्भृतम् ॥ ११३ ॥
तद्गर्भे कूपिकां क्षिप्त्वा हठाग्निं ज्वालयेत्ततः ।
स्वांगशीतं च तद्ग्राह्यमेतन्मारणमुच्यते ॥ ११४ ॥

इह सारणसंस्कारे कृते यावंतो रक्तषोटस्य गद्याणा भवंति तेभ्यो द्विगुणात्तु शुद्धमनःशिलागद्याणान् गाढं सूक्ष्मचूर्णरूपान् कृत्वा प्रौढकाचकूपीमध्येऽर्धचूर्णं क्षिप्त्वा ततो रक्तषोटं मुक्त्वा पुनरुपरि शेषं मनःशिलाचूर्णमधः क्षिप्त्वा कूपीमध्येऽधश्चूर्णं क्षिप्त्वा ततो रक्तषोटं मुक्त्वा पुनरुपरि शेषं मनःशिलाचूर्णमधः क्षिप्त्वा कूपीद्वारेऽभ्रस्य चातिकां दत्त्वा सप्ततारं तस्यां कूपिकायां परितः कर्पटमृत्तिकां दत्त्वाऽरण्यछाणकैः पूर्णायां पुरुषप्रमाणखनितगर्त्तायां मध्ये कूपी मुक्त्वा हठाग्निर्ज्वालनीयः । यदि च ज्वलिता स्वयं शीतलं भवति तदा कूपीमध्यात् सरसो ग्राह्यः । एतन्मारणमुच्यते । अत्रामा-

यः । खड्डायामर्धं यावच्छणकानि मुत्क्वोपरि कूंपी मुच्यते ततः पार्श्वेषत्तथोपरि छाणकैर्गर्त्ता भ्रियते ।

इति सारितसूतस्य मारणसंस्कारश्चतुर्दशः ॥ १४ ॥

संस्कारैर्मनु (१४) संख्यैश्च सूतः संस्कृत्य मारितः ।
खल्वे क्षिप्त्वा स संपिष्टः प्रोच्यते प्रतिसारणम् ॥ ११५ ॥

इह मनुसंख्यैश्चतुर्दशभिः संस्कारैरनंतरोक्तैः संस्कृत्य यो मारितसूतः सुखल्वे क्षिप्त्वात्यर्थं पिष्यते । एतत्प्रतिसारणं भण्यते ।

इति मारितसूतस्य प्रतिसारणसंस्कारः पंचदशः ॥ १५ ॥

मारितं मृतनागेन हेम तस्यापि चूर्णकम् ।
यत्प्रतिसारणे क्षिप्यमेतक्क्रामणमुच्यते ॥ ११६ ॥

इह मृतसीसकेन कांचनं सारयित्वा तस्य मृतकांचनस्य चूर्णं यत् प्रतिसारितरसे क्षिप्यते । एतत्क्रामणं कथ्यते ॥

इति प्रतिसारितसूतस्य क्रामणसंस्कारः षोडशः ॥ १६ ॥

नागकांचनमारणविधिश्चाग्रे स्वयमेव वक्ष्यति ॥

नागवल्ल्याश्च पत्रेण तदंतंत्तामितरम्(?) ।
रतिमात्रं क्षिपेत् कुर्यान्नागपत्रस्य वेढनीम् ॥ ११७ ॥
गालयित्वाथ तच्चूर्णं सर्वलोहेषु निक्षिपेत् ।
गाल्यमानेषु तायेत सहस्रस्य प्रवेधकम् ॥ ११८ ॥

इह प्रथमं शुद्धनागस्यैकेन पत्रेवद्येन पत्रं कृत्वा तत्र रतिमात्रं क्रमितं रसं क्षिप्त्वा नारापत्रस्थातनु(?)गालयित्वा वेढनीं च कृत्वा तां वेढनीं गालयेत् । ततश्चूर्णं भवति । ततः पूर्वोक्तानि सर्वाण्यपि नागवंगादिलोहानि रतिसहस्रमात्राणि गालयित्वा भ्रमत्येव लोहरसे रतिमात्रं वेढनीरसं चुर्णं क्षिपेत् । ततस्तले सक्तं सुवर्णं ग्राह्यम् । एष सहस्रवेधको रसः ।

इति क्रामितसूतस्य वेधकसंस्कारः सप्तदशः ॥ १७ ॥

गालिते नागगद्याणे सूतगद्याणकं क्षिपेत् ।
तच्चूर्णमध्ये क्षेप्तव्यो गद्याणो गंधकस्य च ॥ ११९ ॥
सर्जिकायाश्च गद्याणे मिलिते स्याच्चतुष्टयम् ।

चूर्णं संपिष्य कर्त्तव्यं जलेनालोडयेत्ततः ॥ १२० ॥
शरावसंपुटे क्षिप्त्वा नीरंध्रवस्त्रमृत्स्नया ।
हस्तप्रमाणिकं गर्त्तं खनित्वा छाणकैर्भृतम् ॥ १२१ ॥
शरावसंपुटं गर्त्ते क्षिप्त्वाग्निर्ज्वालयेत्ततः ।
स्वांगशीतं गृहीत्वा तत्कर्त्तव्यं सूक्ष्मचूर्णकम् ॥ १२२ ॥
गालिते विद्धसूतेऽथ क्षिप्त्वा सर्षपमात्रकम् ।
एवं कृते च सूतस्योद्घाटनं जायते ध्रुवम् ॥ १२३ ॥

ततस्तस्य चूर्णस्य मध्ये गंधकस्य गद्याणकः । सर्जिकायाश्च गद्याणकः क्षेप्यः । तत गालितनागगद्याणकः १ सूतगद्याणकः २ गंधकगद्याणकः१एवं गद्याणकचतुष्टयं मेलयित्वा गाढं संपिष्य चूर्णं कृत्वा जलेनालोडयित्वा पुनः शोषयित्वा ततः शरावसंपुटे क्षिप्त्वा संपुटसंधौ च वस्त्रमृत्तिकां दत्त्वा ततो हस्तप्रमाणायां गर्तायां मध्ये छाणकानि क्षिप्त्वोपरि शरावसंपुटं दत्त्वा मुक्त्वा पुनः पार्श्वेषूपरि छाणकैः खंडीभूत्वाग्निर्ज्वालनीयः । यदि च ज्वलित्वा न स्वयं स्थितो भवति तदा संपुटमध्यादौषधं गृहीत्वा सूक्ष्मचूर्णं कृत्वा वेधसंस्कृतस्य गालितस्य रसस्य मध्ये सर्षपमात्रं गद्याणचतुष्टयं सूक्ष्मचूर्णं क्षिपेत् । अत्र च सूतमध्ये क्षेप्यौषधस्य प्रमाणं भणितम् । न पुनर्विद्धरसस्य । तथागुरुभिरप्यस्य प्रमाणं नोक्तम् । ततोऽनुमानेनेति ज्ञायते । पश्चात्सर्वत्र चतुःषष्टिपलानि रसस्य प्रोक्तानि । ततस्तावता रसेन यावदौषधं वेधसंस्कारे क्रियमाणे निष्पन्नं तावत् एवौषधस्य रसस्य मध्ये गद्याणकचतुष्टयं पूर्णं सर्षपमात्रं क्षेप्तव्यम् । दिवा श्रीगुर्वाज्ञया यावत्प्रमाणं जानाति । एवं सर्षपमात्रे चूर्णे क्षिप्ते विद्धसूतस्योद्घाटनं भवति । उद्घाटनं नाम सर्वधातुवेधे सर्वरोगापहारे च ।

इत्यष्टादशः संस्कारः ॥ १८ ॥

अथराजिस्वरूपमाह ॥

जीवशुल्बस्य भागैकं द्वौ भागौ शुद्धहेमजौ ।
भागत्रयं समावर्त्तपत्रं कुर्यात्सुजटुकम्(?) ॥ १२४ ॥
निंबूकानां रसैः क्षुत्वा यन्नात्तंशिलयामृतम्(?) ।

तेन लेपः प्रदातव्यो जडपत्रस्य पक्षयोः ॥ १२५ ॥
चित्रकूटस्य षड्भागं भागैकं लवणस्य च ।
समभागेन संचूर्ण्य भर्त्तव्या स्थालिका ततः ॥ १२६ ॥
लिप्तं पत्रं च तन्मध्ये ब्रुडंतं चोर्ध्वगं क्षिपेत् ।
शरावेऽधोमुखे दत्ते कंठं निरंध्रयेन्मृदा ॥ १२७ ॥
ततो ह्यधोमुखीं दद्याच्छरावोपरि ढंकणीम् ॥
स्थालिकाधश्चतुर्यामं हठाग्निं ज्वालयेदधः ॥ १२८ ॥
विधिना हि च तेनैवं पत्रं फाडीत्रयं भवेत् ।
गृहीत्वा मध्यमां फाडीं पक्षफाडीद्वयं त्यजेत् ॥ १२९ ॥
मध्यफाड्याश्च चूर्णेन हेमराजिर्भवेद् ध्रुवम् ।
चतुषष्टयंशदानेन जार्यश्चाष्टगुणो रसात् ॥ १३० ॥

इह मानशुल्बं मारयित्वा पुनर्जीव्यते तं जीवंतं शुल्बं कथयन्ति । ततस्तच्छुल्बस्यैको भागः तथा द्वौ हेमभागौ एवं भागत्रयं गालयित्वा इति तत् स्थूलं पत्रं कुर्यात् । ततो मनःशिलायां निबुकरसैश्च नागं मारयित्वा जतुपत्रमुभयपार्श्वयोस्तेन मारितनागेन लेपनीयम् । ततश्चित्रकूटखटीलवणयोः समभागेन चूर्णं कृत्वा स्थालीं भृत्वा तस्य मध्ये ऊर्ध्वं ब्रुडंतं पत्रं मुक्त्वा मुखेऽधोमुखं शरावं कृत्वा साध कंठे मृदा लिप्त्वा शरावस्योपर्यधोमुखं ढंकणीं दत्वा स्थालिकाधः प्रहरचतुष्कं यावत् हठाग्निर्ज्वालनीयः । एवं च कृते पत्रस्य फाडीत्रयं जायते । ततो या मध्यमा फाडी तां गृहीत्वा मर्द्दनीयं पार्श्वफाडीद्वयम् च त्यजनीयं, यच्च मध्यफाडीचूर्णं सा हेमराजिरुच्यते । तस्य चतुःषष्टितमो भागः पूर्वोक्त युक्त्या पूर्वप्रोक्तस्य रसस्य दातव्यः । एवं तावद्यावदष्टगुणो हेमराजिं दत्वा पूर्वोक्तरीत्या जारिता भवति ।

इति सर्वोत्कृष्टा हेमराजिः समाप्तः ॥

नागराजिस्तु सामान्या माक्षकी मध्यमा स्मृता ।
उत्तमा घोषराजिश्च यः प्रकाशात्तदुत्तमा ॥ १३१ ॥
पलैकं तीक्ष्णलोहस्य कांसस्यापि पलद्वयम् ।

पलानि नव ताम्रस्य पित्तलस्य पलत्रयम् ॥ १३२ ॥
शिलया मृतनागस्य तिथिसंख्यापलानिच ।
त्रिंशत्पलानि मूषायाः प्रक्षिप्यावर्त्तयेत्सुधीः ॥ १३३ ॥
ततः सुवर्णमाक्षीकं सार्धसप्तपलानि च ।
स्तोके स्तोकेन क्षिप्त्वाथ शनैश्चावर्त्तयेत्सुधीः ॥ १३४ ॥
यावतस्ताम्रभागस्य तत्समानं यदा भवेत् ।
स्तोकः प्रकाशराजिः स्यात् प्रथमा परिकीर्त्तिता ॥ १३५ ॥

इह या नागराजिः सा सामान्या स्वल्पकार्यकारी । माक्षिकाराजिर्मध्यमकार्यकारी । व्योषराजिरुत्तमा बहुकार्यकारी । अयःप्रकाशराजिस्ताभ्यः सर्वाभ्यो राजिभ्य उत्तमा सर्वोत्तमकारीत्यर्थः । ततः प्रथममयःप्रकाशराजिरुच्यते । पलमेकं सारलोहस्य कांस्यस्य च पलद्वयम् । पलानि नव शुद्धताम्रस्य पलत्रयं पित्तलायाः । मनःशिलामारितनागस्य पञ्चदशपलानि । एवं सर्वसंख्यायास्त्रिंशत्पलानि मूषायां प्रक्षिप्यावर्त्तनीयानि । ततः सुवर्णमाक्षिकस्य सार्धसप्तपलान्यानीय स्तोकेन मध्ये क्षिप्त्वा पुनः शनैस्तावदावर्त्तनीयानि यावता ताम्रभागप्रमानानि भवन्ति । अयमर्थः। ताम्रपलानि नव सन्ति । ततः सर्वो रस आवर्त्तयित्वा यदा नवपलप्रमाणो भवति तदा प्रथमासावयःप्रकाशराजिः कथ्यते । इति सर्वोत्तमायःप्रकाशराजिः कथ्यते ।

तीक्ष्णलोहस्य चूर्णेन समानं कांस्यचूर्णकम् ।
प्रक्षिप्यावर्त्य मूषायां क्रियते चैकपिण्डकम् ॥ १३६ ॥
पिण्डादर्धगुणं नागं क्षिप्त्वा जार्यं पुनः पुनः ।
व्योषराजिर्भवेज्जीर्णे नागे कांस्याच्च षड्गुणे ॥ १३७ ॥

सारलोहचूर्णं कांस्यचूर्णं च सममात्रया मूषायां क्षिप्त्वा तत आवर्त्य एकपिण्डं क्रियते । ततस्तस्मात्पिण्डादर्धमात्रया शुद्धनागं मध्ये क्षिप्त्वा मूषायां पुनः पुनरावर्त्त्य जारणीयम् । ततः पुनरप्यर्धमात्रया नागं क्षिप्त्वा जार्यम् । यदि चैवं पुनःपुनर्जारणेन कांस्यात् षड्गुणं नागं जीर्णं भवति । तदा व्योषराजिर्जायते । इति व्योषराजिः कांस्यराजिरित्यर्थः ।

शुद्धताम्रस्य चत्वारि पलान्यावर्त्तयेत् पृथक् ।
थुथापलानि चत्वारि माक्षिकं च चतुःपलम् ॥ १३८ ॥
पलाष्टानां कृतं चूर्णं स्तोके स्तोकेन प्रक्षिपेत् ।
ताम्रशेषं भवेद्यावद्राजिर्माक्षीकजा मता ॥ १३९ ॥

प्रथमं शुद्धताम्रस्य चत्वारि पलानि पृथगावर्त्तयित्वा ततस्तन्मध्ये थुथापलानि चत्वारि चत्वारि माक्षीकपलान्येवमष्टौ पलानि चूर्णीकृत्य स्तोकेन स्तोकेन क्षिप्त्वा पुनः पुनरावर्त्य तावज्जारयेत् । यावता ताम्रशेषं भवति । सर्वमौषधं चत्वारि पलानि जार्यत इत्यर्थः ।

इति माक्षिकराजिस्तृतीया ॥ ३ ॥

यावच्छुल्वस्य भागैकं शनैरावर्त्तयेत्पृथक ।
शिलया मृतनागाष्टौ थूथाभागचतुष्टयम् ॥ १४० ॥
पिष्ट्वा चूर्णीकृते शुल्बे स्तोकस्तोकेन प्रक्षिपेत् ।
नागराजिभवेच्चेयं.....॥ १४१ ॥
राज्यभ्युच्छ्रितलोहानां चूर्णं कार्यं सदा बुधैः ।
तज्जैश्च राजिरेकैका जार्या चाष्टगुणा रसात् ॥ १४२ ॥

शुद्धताम्रस्य भागमेकं मूषायां गालयित्वा ततो मनःशिलाया भागाश्चत्वारो मृतनागस्य भागास्तथा चत्वारः तथा चत्वारः थुथाभागाः । एवं द्वादशभागांश्चूर्णीकृत्य स्तोकेन शुल्वमध्ये क्षिप्त्वा तावदावर्त्तयेद्यावताम्रशेषं भवति । एषा नागराजिः प्रोच्यते ।

थूथानागराजीनां फलमाह—

राज्यभ्युच्छ्रितलोहानामित्यादि चतसृणामपि राजीनां लोहस्य चूर्णं कृत्वैकैकराजिः । रसमध्ये पूर्वोक्तरसयुक्त्याष्टगुणा जारणीया क्रमेणेति राजिकरणविधिः ।

इतिनागराजिश्चतुर्थी ॥ ४ ॥

अथखापरसत्त्वपातनाविधिः ।

मणैकं रसकस्याथ नृमूत्रेण दिनत्रयम् ।
क्वाथयित्वाऽऽतपे शुष्कं यामं दुग्धेन पाचयेत् ॥ १४३ ॥

शुष्कं चूर्णीकृतं तस्मिन् क्षेप्योऽष्टांशः खलस्य च ।
टङ्कणक्षारतुर्यांशोऽष्टांशः पूर्वगुडस्य च ॥ १४४ ॥
साधिते ये मृदो मूषे कचूलाकारवर्त्तुले ।
एकस्याश्चांतरे क्षिप्त्वा मूषां चूर्णस्य वर्त्तताम् ॥ १४५ ॥
अपरस्यां पुननालं मूर्ध्वं चतुर्दशांगुलम् ।
मृन्मयं छिद्रं बुध्ने विन्यसेत्तामधोमुखीम् ॥ १४६ ॥
निरुध्नतत्समस्तं च परितो वस्त्रमृत्स्नया ।
यन्त्रस्तुंबीनलीनां वै कर्त्तव्यः सत्त्वपातने ॥ १४७ ॥
कोठीमध्ये क्षिपेद्यन्त्रं बबूलखदिरांवली ।
प्रभृतीनां मृतांगारैः पूर्णं पूर्णं धमन्मुहुः ॥ १४८ ॥
सदंशैश्च विधृत्यास्तुंबीनलीमधस्ततो मुखीम् ।
मूषामध्याद् धृतं यावत्सर्वं क्षापरकम् ॥ १४९ ॥

रसकस्य खापरस्य मणमेकं नरमूत्रेण दिनत्रयं क्वाथयित्वा आतपे दत्त्वा शोषयित्वा प्रहरमेकं दुग्धेन पाचयित्वा पुनः शोषयित्वा चूर्णीकृत्य तन्मध्येऽष्टभागेन खलश्चतुर्थभागेन टंकणक्षारोऽष्टमभागेन पूर्वगुड एतानि त्रीणि क्षिपेत् । ततो मृत्तिकया मूषाद्वयं कच्चोलकसमानं प्रौढं वर्त्तुलाकारं कृत्वा एकस्यां मूषायां पूर्वोक्तखापरचूर्णं क्षिप्त्वा सा मूषाधोमुखी नालोपरि मोक्तव्या । ततः कर्पटमृत्तिकया सर्वपार्श्वेषु निश्छिद्रं विधाय सत्त्वपातनाय ईदृशस्तुंबनली नामा यन्त्रः कर्त्तव्यः । ततः कोठीमध्ये बबूल खदिरं आम्बलोप्रभृतीनां लोहालकैः पूरयित्वा यन्त्रं च तत्र क्षिप्त्वा पुनः पुनर्धमित्वा सन्दंशैरधोमुखीं यन्त्रनलीं धृत्वा यावन्मात्रो रसो मध्याद् गलित्वाधोमूषायां समेति तत् खापरसत्त्वं कथ्यते ।

इति खापरसत्त्वपातनविधिः ।

अथमनःशिलासत्त्वपातनविधिः ।

श्रेष्ठा कणयरी खल्वे पेष्या मनःशिला बुधैः ।
पिदध्याद्भ्रकेणास्यं तां क्षिप्त्वा काचकुंपके ॥ १५० ॥

दद्यात्सलवणं दग्धाश्मचूर्णं मस्तकोपरि ।
वस्त्रमृत्तिकया लिंपेत्समग्रमपि कुम्पकम् ॥ १५१ ॥
भक्त्वा पक्वघटं कण्ठे मुक्त्वा मूलिप्तकुम्पकम् ।
हठाग्निज्वालनीयोऽधो यामं द्वादशकं मणे ॥ १५२ ॥
कुंपोदरं भवेद्रिक्तं सत्त्वं गलति कण्ठके ।
कुंपं भक्त्वा शिलासत्त्वं ग्राह्यं यत्नेण धीमता ॥ १५३ ॥

सर्वोत्तमा कणयरी मनःशिला खरले पिष्ट्वा कुम्पे क्षिप्त्वा अभ्रकेण कुंपमुखं पिधाय लवणसहितं दग्धपाषाणचूर्णं मस्तके दत्वा वस्त्रमृत्तिकया सर्वां कुंपां मुक्त्वाधोमनःशिलां प्रति प्रहरद्वादशकं यावत् हठाग्निर्ज्वालनीयः । ततः सत्त्वमुड्डीय कण्ठे लगति । कुम्भोदरं च रिक्तं भवति । एवं कुंपं भंक्त्वा कण्ठलग्नं सत्त्वं ग्राह्यम् ।

इति शिलासत्त्वपातनविधिः ।

अथ त्रिधान्नपथदोरककरणम् ।

अथ त्रिप्रकारं षड्लोहद्युतिकरणं यथा—

भावेनापि मृतो भेको यत्र कुत्रापि लभ्यते ।
स्फटिकष्टंकणक्षारस्तस्य खोटा तु सूक्ष्मका ॥ १५४ ॥
भेकोदरं विदार्याथ ते क्षेप्याः सूक्ष्मखोटकाः ।
घृततैलादिना दिग्धं स्थाल्यां भेकं क्षिपेच्च तत् ॥ १५५ ॥
प्रध्वरां ढंकणीं दत्वा स्याली भूमौ निखन्यते ।
भुवः स्थालीं समाकृष्य ह्यतीतैः षष्टिवासरैः ॥ १५६ ॥
स्थाल्या मध्याद् विशुध्यैवं ग्राह्यं तच्च समग्रकम् ।
खर्ले प्रक्षिप्य तत्सर्वं पेष्टव्यं चातिसूक्ष्मकम् ॥ १५७ ॥
गालयित्वाथ गद्याणं हिमजं तिथिवर्णकम् ।
तन्मध्ये भेकचूर्णस्य वल्लः क्षेप्यो विचक्षणैः ॥ १५८ ॥
न बन्धो जायते हेम्नो जातं तद्वरूपितम् ।
इयं हेमद्युतिर्जाता तज्ज्ञैर्निष्पादिता किल ॥ १५९ ॥

हेमान्तर्निहिते वल्ले यथा स्यात्काञ्चनी द्युतिः ।
कान्तिलोहे तथा रूप्ये वङ्गे नागे तथैव च ॥ १६० ॥
ताम्रे षट्स्वपि लोहेषु चूर्णं षोडशवेधकम् ।
षण्णां मध्याच्च लोहाणां कस्याप्येकस्य गालिते ॥१६१॥
गद्याणे वल्लमात्रं च प्रक्षिपेद्धेमचूर्णकम् ।
तल्लोहं द्रवरूपं स्यात्तन्नाम्नैव द्युतिर्भवेत् ॥ १६२ ॥
षड्लोहद्युतिस्तज्ज्ञैः कृता भवेत्मकर्मणा ।
अनया यानि कर्माणि वक्ष्यन्ते तानि धातुषु ॥ १६३ ॥

स्वभावेन मृतस्य भेकस्यादरं विदार्य स्फाटिकोज्ज्वलटंकणक्षारस्यातिसूक्ष्माः खोटांस्तत्र क्षिप्त्वा ततो घृततैलादिना दिग्ध्वा मध्येस्थालि भेकं मुक्त्वोपरि प्रथरां टंकणीयं दत्त्वा भूमिमध्ये स्थाली निखन्यते । षष्टिदिनैः पुनः स्थालीमाकृष्य मध्यात्सर्वं गृहीत्वा खरले पिष्ट्वा चूर्णं कार्यम् । ततः सर्वोत्तमं सुवर्णगद्याणकं गालयित्वा वल्लमात्रं भेकचूर्णं मध्ये क्षिप्यते । ततस्तत्सुवर्णं पुनर्बंधं नाप्नोति किंतु द्रवमेव तिष्ठति । इयमेवं सुवर्णद्युतिर्भवति । इयं च सुवर्णद्युतिरेवं कान्तलोहे रूप्ये वंगे नागे ताम्रे च गद्याणमात्रे च गालिते वल्लमात्रं भेकचूर्णं क्षिप्यते । ततो द्रवरूपाणि सर्वाणि भवेयुस्तत्तन्नाम्नी च द्युतिर्भवति। लोहद्युतिः, रूप्यद्युतिः, वंगद्युतिः, नागद्युतिस्ताम्रद्युतिश्चेति।

इति षड्लोहद्युतिकरणं प्रथमम् ।

पीताङ्गादेव दार्वीं च पञ्चाङ्गं कुरु खण्डशः ।
कर्परे ज्वालयित्वा च कर्तव्यं भस्म सूक्ष्मकम् ॥ १६४ ॥
शेषान्ते एव पञ्चाङ्गं निशाहायां च वर्त्तयेत् ।
तद्रसेनैव दातव्या भावनास्यैव भस्मनः ॥ १६५ ॥
गालिते चैकगद्याणे तिथिवर्णे च हेमजे ।
प्रक्षिप्ते भस्मनो वल्लं वल्लं च प्रक्षिपेत्पुनः ॥ १६६ ॥
एवं गद्याणमध्ये च जार्यो गद्याणकः सदा ॥
इत्थं हेमद्युतिर्जाता सर्वलोहेष्वयं विधिः ॥ १६७ ॥

पंचांगपीतदेवदालीखण्डानि कृत्वा कर्परे ज्वालयित्वा गाढं भस्म क्रियते ततस्तस्या एव देवदाल्या रसेन भावना तस्य भस्मनो दातव्या। ततः पञ्चदशवर्णिककांचनगद्याणकं गालयित्वा वल्लमात्रं देवदालीभस्म क्षिप्त्वा जारणीयम्। एवं पुनःपुनर्वल्लमात्रक्षेपे यदा गद्याणकमात्रं भस्म जीर्णं स्यात्तदा कांचनद्रुतिर्भवति। एवं लोहादिष्वपि देवदालीभस्म जारणेन तत्तन्नाम्नो द्रुतिर्भवति।

इति षड्लोहद्रुतिकरणं द्वितीयम्।

ज्वालयेत्कर्परे श्वेतं देवदाल्यङ्गपञ्चकम्।
गोमूत्रैर्भावना देया भस्मनस्त्वेकविंशतिः॥ १६८॥
ततः षट्स्वपि लोहेषु कार्यः प्रागुदितो विधिः।
जायते षट्सु लोहेषु द्रुतिरेवं न संशयः॥ १६९॥

श्वेतदेवदालिपंचांगखण्डानि कृत्वा कर्परे ज्वालयित्वा भस्म कृत्वैकविंशतिभावनां गोमूत्रेण भस्मनो दत्वा पूर्ववत् षड्लोहमध्ये श्वेतदेवदालीभस्म लेप्यम्। सर्वलोहानां द्रुतिर्भवति।

इति षड्लोहद्रुतिकरणं तृतीयम्।

एवं लोहद्रुतिकरणस्य त्रयो भेदाः।

अथषड्लोहमारणविधिः।

नागं मनःशिला हंति हरितालं च वङ्गकम्।
हिंगुलेन तथा लोहं ताम्रं च शुद्धगन्धकम्॥ १७०॥
रूप्यं च तिलमाक्षीकं स्वर्णं नागेन हन्यते।
यथा ताम्रविधिः प्रोक्तः स विधिः पञ्चमारणे॥ १७१॥

मनःशिलया नागं हरितालेन वंगं हिंगुलेन लोहं शुद्धगन्धकेन ताम्रं तिलमाक्षिकेण रूप्यं नागेन सुवर्णं च म्रियते। ततो येनविधिनेति।

पत्रं ताम्रस्य चूर्णं वा कृत्वा मुञ्चेत्पृथक् सुधीः।
शुद्धगन्धकचूर्णं च ताम्राच्च द्विगुणीकृतम्॥ १७२॥
क्षुण्णं रसेन कुमार्या दुग्धेन तदसम्भवे॥
तस्य पूपाद्वयस्यान्तः प्रक्षिपेत्ताम्रपत्रकम्॥ १७३॥

सरावसम्पुटस्यान्तस्तत् क्षिप्त्वा लिप्य मृत्स्नया ।
संन्धिवस्त्रमृदा लिप्त्वा कटाहे तत्क्षिपेत् पुटम् ॥ १७४ ॥
छाणकानि कटाहीतत्क्षिप्त्वाग्निं ज्वालयेत्ततः ।
ज्वलिते शीतलीभूते ताम्रं ग्राह्यं मृतं बुधै ॥ १७५ ॥

ताम्रस्य पत्रं वा चूर्णं कृत्वा ततस्ताम्रं द्विगुणं शुद्धं गंधकचूर्णं कुमारीरसे नागो दुग्धेन वा गाढं मर्दित्वा पूपाकारं च कृत्वा मध्ये पूर्वकृतताम्रपत्रचूर्णं वा क्षिप्त्वा पूपाकारं सरावसंपुटे मुक्त्वा संधौ वस्त्रमृत्तिकया लिप्त्वा सर्वतो मृत्तिकया लिप्त्वा कटाहमध्ये सरावसंपुटे क्षिप्त्वा छाणकैश्च कटाहं भृत्वा निर्ज्वालनीयः । ततो ज्वलित्वा शीतले जाते सति ताम्रं मृतं ग्राह्यं ।

इति ताम्रमारणविधिः ।

येन विधिना गंधकेनात्र ताम्रं मारितं तेनैव विधिना नागादीनि पंच लोहानि कार्ये सति मारणीयानि ।

इति षड्लोहमारणविधिः ।

अथ त्रिधान्नपथ्य हीरककरणं पंचधामारणम् ।
बीजपूरस्य यद्वृन्तं कुर्यादुत्तार्य रंध्रकम् ।
तन्मध्ये हीरकं जात्यं क्षिप्त्वा वृन्तेन छादयेत् ॥ १७६ ॥
बीजपूरं समग्रं तु वेष्टयेद्वस्त्रमृत्स्नया ।
दैर्घ्ये चाधस्तथा व्यासे गर्त्तं हस्तप्रमाणकम् ॥ १७७ ॥
छाणकैः स्थापितैः पूर्णे तद्गर्त्ते बीजपूरकम् ।
पिदध्यात्कर्परेणास्यं मध्ये वह्निं क्षिपेत्ततः ॥ १७८ ॥
ज्वलित्वा शीतलीभूते नवनवैर्बीजपूरकैः ।
पुनः पुनः प्रकर्त्तव्यो नववेलमयं विधिः ॥ १७९ ॥
निसाहायां च संवर्त्य सुसूक्ष्मा वढवाइका ।
तत्पिण्डान्तः क्षिपेद्वर्जं पिण्डः सरावसंपुटे ॥ १८० ॥
भर्त्तव्या प्राक्कृता गर्त्ता छाणकैः स्थापितैः पुनः ।
तत्पृष्टं वस्त्रमृल्लिप्तं गर्त्ता गर्भे पचेत्सुधीः ॥ १८१ ॥

नूत्नाभिर्वडवाईभिर्नवधा सम्पचेन्मुहुः ।
ततो राजबदर्याश्च शाखा किशलयात्मिका ॥ १८२ ॥
तां गृहीत्वाथ तद्गर्भे रंध्रं कुर्याद्विचक्षणः ।
नेसहिंगुमधश्चोर्ध्वं दत्वा तं हीरकं क्षिपेत् ॥ १८३ ॥
वस्त्रमृदाथ नीरंध्रशाखाकिशलयं ततः ।
प्राक्प्रमुक्तगर्तायां नवधा पूर्वरीतिजा ॥ १८४ ॥
नेसहिंगुमये खोटे रंध्रं कृत्वाथ हीरकम् ।
क्षिप्त्वास्यं हिंगुनाछाद्य मुषरिमाषपीठिका ॥ १८५ ॥
क्षिप्त्वा तत्तैलसम्पूर्णे पात्रेऽग्निज्वालयेदधः ॥
युक्त्यैवं नवधा कार्यं हिंगुखोटे नवे नवे ॥ १८६ ॥
विधिना त्रिपथो जात्यो हीरको जायते स्फुटम् ।
थूथाबिडेन सम्पिष्य रसे जारयते सुधीः ॥ १८७ ॥

बीजपूरस्य वृंत्तमुत्पाट्य मध्ये उत्कीर्य रंध्रं कृत्वा तत्र हीरकं जात्यं क्षिप्त्वोपरिवृंतेनाछाद्य वस्त्रमृत्तिकया समग्रं बीजपूरकं वेष्टयित्वा ततो हस्तमात्रं दीर्घा हस्तमात्रं पृथुला हस्तमात्रं चाध एवं गर्त्तां कृत्वा स्थापितैः छाणकैः पूरयित्वा तत्र बीजपूरकं मुक्त्वोपरि मुखे कर्परं दत्वा छाणकेषु वह्निर्देयः। ततो ज्वलित्वा शीतलीभूते बीडापूर्वं ततः पुनर्द्वितीयं बीजपूरमानीय पूर्ववत्सर्वं कृत्वा गर्त्तायां हीरकबीजपूरे क्षिप्त्वा छाणकानि ज्वालयित्वा शीतलीभूते सति बीजपूरमध्याद् हीरको ग्राह्यः । एवं नवनववारं नवनवैर्बीजपूरैः स एव हीरकः पचनीयः। ततो वडवाईकानिसाहायां वर्त्तयित्वा तत् पिण्डं कृत्वा तत्र मध्ये स एव हीरकः क्षेप्यः । ततस्तं पिण्डं सरावसंपुटातः क्षिप्त्वा सर्वतो वस्त्रमृत्तिकया लिप्त्वा पूर्वतः कृतगर्त्तां छाणकैः भृत्वा तस्यां गर्त्तायां सरावसंपुटं मध्ये मुक्त्वाग्निज्वालनीयः । ततः शीतलीभूते पुनरन्यासां वडवाईकानां पिण्डमध्ये तमेव हीरकं क्षीप्त्वा तथैव ज्वालयित्वा हीरको ग्राह्यः । एवं नववारं नवनवाभिर्वडवाईकाभिः स एव पचनीयः राजबदर्याः किशलयरूपां कोमलां शाखामनीय तस्यां छिद्रं कृत्वा नेसहिंगुं तत्राध उर्ध्वं च दत्वा छिद्रमध्ये तमेव हीरकं

क्षिप्त्वा वस्त्रमृत्तिकया निच्छाद्य पूर्वछाणकपूर्णगर्त्तायां पचेत् । ततः पुनर्बदरीशाखाकिशलयच्छिद्रे हीरकं क्षिप्त्वा तथैव गर्त्तायां पचनीयः। एवं नववारं नवनवो राजबदरीशाखाकिशलयैः स एव हीरकः पचनीयः । ततो महतो नेसहिंगुखोटस्य मध्ये रंध्रं कृत्वा तमेव हीरकं क्षिप्त्वा मुखं च नेसहिंगुना आछाद्योपरि माषपीठीं दद्यात्ततस्तैलपूर्णे पात्रे तं हिंगुखोटं क्षिप्त्वाऽधोऽग्निर्ज्वालनीयः । ततः पुनरपि नवे हिंगुखोटे तथैव । एवं नववारं नवनवैर्नेसहिंगुखोटैः स एव हीरकः पचनीयः । थूथाबीडेन तं हीरकं सम्पिष्य पूर्वोक्ते रसे शनैः शनैर्जारणीयो हीरकः ।

इत्यन्नपथहीरकजारणं प्रथमम् ।

कर्णेभ्यो महिषीनां च मला ग्राह्याः समग्रकाः ॥
तैश्च सम्पत्तिदो हीरान् जात्यान्सम्वेष्टयेत्सुधीः ॥ १८८ ॥
सूरणक्षुद्रकंदेषु तत् क्षिप्त्वा वस्त्रमृत्स्नया ॥
वेष्टयित्वा पुटं देयं भूमौ कुर्कुटसंनिभम् ॥ १८९ ॥
वारम्वारं श्रुतिमलैः सूरणक्षुद्रकन्दकैः ॥
वस्त्रमृद्भिर्नवीनाभिर्दातव्यानि पुटानि च ॥ १९० ॥
एकविंशतिवारैश्च भूमौ कुर्कुटकैः पुटैः ॥
विधीयन्ते सुखेनैव हीराश्चान्नपथा बुधैः ॥ १९१ ॥

महिषीणां कर्णमलान् गृहीत्वा जात्यान् हीरान् वेष्टयित्वा तैर्मलैस्ततो मलवेष्टितांस्तान् सूरणक्षुद्रकन्देषु छिद्राणि कृत्वा तत्र च क्षिप्त्वा सर्वतः कर्पटमृत्तिकया लिप्त्वा भूमौ कुर्कुटपुटो दातव्यः । ततः पुनर्हीरकं गृहीत्वा तथैव महिषीकर्णमलैर्वेष्टयित्वा सूरणक्षुद्रकंदमध्ये क्षिप्त्वा वस्त्रमृत्तिकया सर्वतो लिप्त्वा भूमौ छाणकैः कुर्कुटपुटो देयः। एवं पुनः पुनरेकविंशतिवारान् महिषीकर्णमलेन वेष्टयित्वा सूरणक्षुद्रकं तेषु च क्षिप्त्वा भूमौ कुर्कुटपुटान् दत्वाऽन्नपथहीरकाः साधनीयाः ॥

इति हीरकान्नपथकरणो द्वितीयो विधिः ॥

या भूम्या मर्दकी तस्या मृदुपत्राणि वर्तयेत् ॥
तत्पिण्ड्यांतर्विनिक्षिप्य हीरकान् कुरुगोलकम् ॥ १९२ ॥

तं सरावपुटे क्षिप्त्वा सन्धिकर्पटमृत्स्नया ॥
वेष्टयित्वा पुटो देयो भूमौ कुर्कुटसन्निभः ॥ १९३ ॥
नूत्नैर्नूत्नैर्मुहुः सर्वैश्चतुषष्टिपुटानि च ॥
कुर्कुटान्येव देयानि हीराश्चान्नपथीकृताः ॥ १९४ ॥

या भूम्या मर्दकी भूमिफोडी तस्याः पत्राणि कोमलानि वर्त्तयित्वा पिण्डीं च कृत्वा मध्ये जात्यहीरकान् क्षिप्त्वा गोलकान् कृत्वा तान् सरावसंपुटमध्ये मुक्त्वा सन्धौ कर्पटमृत्तिकां च दत्वा भूमौ कुर्कुटपुटं दातव्यम्। ततः पुनस्तथैव भूम्यामर्दकीपिण्डीमध्ये हीरान् क्षिप्त्वा गोलकान् कृत्वा सरावसंपुटे च क्षिप्त्वा कर्पटमृत्तिकां च सन्धौ दत्वा भूमौ कुर्कुटपुटो देयः। एवं नवनवैर्भूम्यामर्दकीपत्रपिण्डीगोलकैस्ते हीरका भूमौ चतुःषष्टि कुर्कुटपुटानि दत्वान्नपथाः कार्याः। अयमर्थः। अन्नवत्पक्वा भवन्ति रसे च जीर्यन्ते ॥

इति हीरकान्नपथकरणे तृतीयो विधिः ॥

अग्निना दह्यते नैव भज्यते न हतो घनैः ॥
जले ब्रुडति नैवायं दुःशक्यो हि परीक्षितुम् ॥१९५॥
लीलकं हस्तयोः क्षिप्त्वा हीरकानां च विंशतिः ॥
हस्ताभ्यां मर्दनीयास्ते नस्युर्निस्तेजसश्च ये ॥ १९६ ॥
येष्वेका न भवेद्रेखा ते जात्या हीरकाः स्मृताः ॥
कर्परं पक्वपानीयं गर्त्ताः कार्या स्त्वनेकशः ॥ १९७ ॥
जात्यहीरान् क्षिपेत्तेषु ततस्तु मृतजीविभिः ॥
ध्मात्वा ध्मात्वा शिखिवर्णं कार्यं तज्ज्ञैश्च कर्परम् ॥१९८॥
नृमूत्रं शौहरं दुग्धं तुल्यमेकत्र मिश्रितम् ॥
ताभ्यां विध्यापयेद् ध्मातं कर्परं च मुहुर्मुहुः ॥ १९९ ॥
कर्परेषु नवीनेषु गर्त्तान्कृत्वाथ हीरकान् ॥
तानेव ध्मापयेत् क्षिप्त्वा ध्मातान् मिश्रेण छंटयेत् ॥२००॥
युक्त्यानया सप्तवारं ध्मात्वा विध्यापयेन्मुहुः ॥
तादृशाः प्रथमे ध्माने जाम्बुलाः स्युर्द्वितीयके ॥ २०१ ॥

निस्तेजसस्तृतीये तुर्ये त्र्यस्राश्च वर्त्तुलाः ॥
पंचमे छाणिका छिन्नाश्छिद्यन्ते हीरका ध्रुवम् ॥२०२॥
हस्ताभ्यां मर्दिताः षष्ठे भज्यन्ते सप्तमे पुनः ॥
भस्मीभूतास्ततस्तेषां प्रक्षेप्यं भस्म कुंपके ॥ २०३ ॥

अयं हीरकोऽग्निना न दह्यते घनराजतो न भज्यते पानीये न प्लवति अतः कारणात् हीरकः परीक्षितुं दुःशक्यः । तथापि परीक्षा प्रोच्यते । प्रथमं हस्तयोर्हीरकं क्षिप्त्वा ततो विशतिहीरकान् हस्तयोर्मुक्त्वा हस्ताभ्यां ते हीरका मर्दनीयास्तेषां च मध्ये ये हीरकास्तेजोरहिता न स्युस्तथा येषु रेखा एकापि न भवति ते जात्या हीरकाः । शेषा अजात्याः । ततश्च पक्वकपरमानीय तत्रानेकान् कटुकान् कृत्वा तेषु हीरकान् क्षिप्त्वा तं हीरकं कपरं लोहालेकैर्धमात्वाग्निवर्णं कृत्वा समभागमेलितनरमूत्रथोहरदुग्धाभ्यां विधमाप्यो हीरकः । एवं नवनवैः कर्परैः सप्तवारं हीरकाः पवनीयाः । ततश्चात्र प्रथमवारे हीरकास्तादृशा एव भवन्ति । द्वितीयवारे लोघुलास्तृतीयवारे निस्तेजसः । चतुर्थवारे वर्त्तुलाः पंचमवारे कर्तव्या छिन्नाः छिद्यन्ते । षष्ठवारे हस्तमर्दिताः भज्यन्ते । सप्तमवारे भस्मरूपास्ततश्चतद्भस्म कुंपे क्षिप्त्वा मोच्यम् ॥

इति हीरकभस्मीकरणं प्रथमम् ॥

गन्धकामलसाराख्यो हरितालो मनःशिला ॥
तुर्यः सुवर्णमाक्षीकः कर्त्तव्याः समतुल्यकाः ॥ २०४ ॥
चत्वारो वारिणा पिष्ट्वा कार्यास्ते राबसदृशाः ॥
पुष्पाख्या घनपुष्पाणि निसाहायां प्रवर्त्तयेत् ॥ २०५ ॥
पिंडं पिष्टस्य कृत्वाथ तन्मध्ये जात्यहीरकान् ॥
क्षिप्त्वाथ गोलकं कृत्वा वज्रमूषान्तरे क्षिपेत् ॥ २०६ ॥
ध्मातां तामग्निवर्णाभां राबामध्ये क्षिपेन्मुहुः ॥
एवमित्थविधिः कार्यो वारानेक चतुर्दश ॥ २०७ ॥
अनायासेन वज्राणि भस्मानि स्युर्न संशयः ॥
चूर्णं विधाय तेषां च प्रक्षिपेत्कुम्पके सुधीः ॥ २०८ ॥

आमलसारको गन्धकः । हरितालमनःशिला सुवर्णमाक्षीकाः । एतान् चतुरोऽपि समभागेन मेलयित्वा जलेन संपिष्य राबसदृशान् कृत्वा ततः पुष्पावल्या बहूनि पुष्पाणि निसाहायां वर्त्तयित्वा पिण्डं च कृत्वा तन्मध्ये हीरकान् क्षिप्त्वा गोलाकारपिण्डं च विधाय वज्रमूषामध्ये तं गोलकं क्षिप्त्वाऽग्निवर्णं च ध्मात्वा पूर्वकृतराबमध्ये पुनः पुनः क्षिप्त्वा मूषां विध्मापयेत् । ततः पुनरपि तान् हीरकान् तथाखापरपिंडमध्ये क्षिप्त्वा वज्रमूषामध्ये क्षिप्त्वा ध्मात्वा च राबामध्ये विधापयेत् । एवं नवनवौषधैश्चतुर्दशवारान् हीरकान् पचेत् ततः सुखेन वज्राणि भस्मीभवन्ति तच्च भस्म कुम्पे क्षेप्यम् ।

इति हीरकभस्मीकरणं द्वितीयम् ॥

केतकीनां स्तनानेव निसाहायां जलं विना ॥
वर्त्तयित्वा रसो ग्राह्यो वस्त्रपूतो हि निर्मलः ॥ २०९ ॥
रसेनानेन सूक्ष्मा च वर्त्तनीया मनःशिला ॥
तया संवेष्टय वज्राणि वज्रमूषान्तरे क्षिपेत् ॥ २१० ॥
विध्यापयार्कदुग्धेन ध्मातां तामग्निभां कृताम् ॥
एवमिच्छन्मुहुः कार्यः सप्तवेलमयं विधिः ॥ २११ ॥
सद्वज्राणि म्रियन्ते च सुखसाध्यानि निश्चितम् ॥
तच्च चूर्णं कुंपे क्षेप्यं मृतहीरकसम्भवम् ॥ २१२ ॥

केतकीनां स्तनान् निसाहायां जलं विनैव गाढं वर्तयित्वा वस्त्रेण च गालित्वा रसो ग्राह्यः । ततस्तेन रसेन मनःशिलां वर्त्तयित्वा तया हीरकान्संवेष्टय वज्रमूषामध्ये क्षिप्त्वाग्निना तां वज्रमूषां ध्मात्वाऽग्निवर्णं कृत्वाऽकदुग्धेन विध्यापयेत् । ततः पुनरपि केतकीस्तनरसवर्त्तितमनः शिलया वज्राणि वेष्टयित्वा वज्रमूषायां क्षिप्त्वा ध्मात्वा चार्कदुग्धेन विध्यापयेत् एवं पुनः पुनः सप्तवेलं कृते वज्राणि भस्मीभवन्ति ।

इति हीरकभस्मीकरणं तृतीयम् ।

मन्दारार्कास्तु ये श्वेतास्तेषां मूलानि दाहयेत् ॥
ज्वाल्यमानेषु तेषु तैश्च कर्त्तव्या मृतजीविनः ॥ २१३ ॥
तेष्वगालेपने तेषु कार्या यत्नेन गर्त्तकाः ॥

तेषु वज्राणि विन्यस्याग्निष्टे सौवर्णके क्षिपेत् ॥ २१४ ॥
आम्बिल्याउलिबबुलैः सम्पत्यामृतजीविभिः ॥
सुवज्रानग्निना ध्मात्वा काथे कौलत्थके क्षिपेत् ॥ २१५ ॥
सुखेनाथ तया युक्त्या मार्यं ते हीरकानुर्धैः ॥
भस्मीभूतं तु वज्राणि चूर्णं क्षिप्यं च कुम्पके ॥ २१६ ॥

इह श्वेत आकमदारमूलानि ज्यालयित्वा लोहालकाः कार्याः । ततस्तेषु लिहालकेषु यत्नेन गर्त्तकान कृत्वा तेषु गर्त्तकेषु वज्राणि प्रक्षिप्य सुवर्णसम्बन्धिनि अग्निष्टे क्षिप्त्वा आम्बिली आउलिबबूल । लोहालकैरग्निसमानं ध्मात्वा कुलत्थ्याः क्वाथमध्ये क्षिप्त्वा विध्यापयेत् । अनया युक्त्या हीरकाः सुखेनापि भस्मीभवन्ति ।

इति हीरकभस्मीकरणं चतुर्थम् ।

अग्निसंयुक्तमूलानि मुखाउल्याः समानयेत् ॥
श्रीखण्डं घर्षयेत्तेषां ससर्षेन प्रलेपयेत् ॥ २१७ ॥
वज्रमूषां तरङ्गगर्भे प्रक्षिप्यो जात्यहीरकः ॥
क्षिप्त्वा श्रीषण्डशेषार्धं मूषामग्निष्टके क्षिपेत् ॥ २१८ ॥
ध्मात्वाद्याग्निनिभां कृत्वा वज्रिदुग्धेव ढालयेत् ॥
सुखेनाथानयायुक्त्या म्रियन्ते जात्यहीरकाः ॥ २१९ ॥
तस्मिंस्तेषां कृते चूर्णं प्रक्षिपेत्कुम्पके सुधीः ॥
यो वज्रभस्मना कर्म्म प्रभावोग्रे भविष्यति ॥ २२० ॥

इहामुखा उल्यामूलानि त्वक्संयुक्तान्येव समानीय तेषां श्रीखण्डशेषाध क्षिप्त्वा सामूषाग्निष्टके मुक्त्वाग्निना ध्मात्वा थोहरदुग्धे ढालनीया । अनया युक्त्या सुखेन हीरका म्रियन्ते । तेषां च मृतानां भस्म कुंपे क्षिपेत् । अनेन हीरकभस्मना यत्कर्म यश्च प्रभावः सोऽग्रे भणिष्यते ।

इति हीरकभस्मकरणं पञ्चमम् ।

एवं पञ्चभिर्भेदैर्हीरकभस्मीकरणं भवति ।

इति हीरकविधिः ।

अथ गन्धकशोधनम्—

स्थालिकायां क्षिपेद् दुग्धं बध्वा शैथिल्यदाथरम् ॥
दाथेर गन्धकं क्षिप्त्वा लिपेत्कण्ठं मृदा दृढम् ॥ २२१ ॥
अग्निष्टं चोपरि क्षिप्त्वा ज्वालयेद् घटिकाद्वयम् ॥
यावद्याति पयो मध्ये स शुद्धो गन्धको भवेत् ॥ २२२ ॥

स्थालिकामध्ये दुग्धं क्षिप्त्वा मुखे शैथिल्यदाथरं बध्वा तत्र दाथरे गन्धकं क्षिप्त्वा कण्ठे मृत्तिकया लिप्त्वोपरि अग्निष्टं क्षिप्त्वा घटीद्वयं यावत् ज्वालयेत्। ततो गन्धको गलित्वा यो दुग्धमध्ये याति स शुद्धगन्धको ज्ञेयः।

इति गन्धकशोधनम् प्रथमम्।

अथ द्वितीयगन्धकशोधनम्।

कर्षे कुण्डलिकाया वा घृतेनाभ्यज्य गन्धकम् ॥
क्षिप्त्वाधो ज्वालयेत्तावद्यावत्तैलोपमो भवेत् ॥ २२३ ॥
तैलाभो ढाल्यते दुग्धं जायते शुद्धगन्धकः ॥
प्रकारद्वयसंशुद्धोऽधिकृतो रसकर्मणि ॥ २२४ ॥

कर्षे वा कुडछी वा घृतेनाभ्यज्य ततस्तत्र गन्धकं क्षिप्त्वाऽधोऽग्निर्ज्वालनीयः। तावत् यावत् गन्धकस्तैलोपमो भवति ततस्तद्गंधकतैलं दुग्धमध्ये ढाल्यते ततो दुग्धं न गृह्यते। एष एव शुद्धगन्धकः। एवं च प्रकारद्वयेन यो गन्धकः शोधितो भवति। स रसकर्मणि उपयुज्यते नान्य इति। इति सुगमम्।

इति गन्धकशोधनं द्वितीयम्।
इति सुगममग्रे गन्धपीठा।

निम्बुकानां रसैः क्षाल्यं यत्किञ्चित्ताम्रपात्रकम् ॥
कृत्वा चात्युज्वलं तत्र शुद्धं रसरन्तीं क्षिपेत् ॥ २२५ ॥
संशुद्धां गन्धकरन्तीं क्षिप्त्वाङ्गुल्या प्रमर्दयेत् ॥
विधिनैवं मुहुः कार्या पीठा गन्धकसूतयोः ॥ २२६ ॥

ताम्रपात्रं प्रथमं निम्बुकानां रसैः पुनः पुनः प्रक्षाल्यात्युज्वलं च

कृत्वा सर्वशुद्धरसस्य रन्ती तथाशुद्धगन्धकरन्ती च प्रक्षिप्याङ्गुल्या गाढं प्रमर्द्य गन्धकसूतपीठी कार्या।

इति गन्धकपीठी प्रथमा।

गन्धकामलसारस्य तथाशुद्धरसस्य च ॥
प्रत्येकं विंशगद्याणान खल्वे एकत्र मर्दयेत् ॥ २२७ ॥
तानं कृत्वा कर्जलीं सूक्ष्मां वाससा गालयेत्ततः ॥
हेमवल्ल्याश्च कन्दानां श्रीखण्डेन रसेन वा ॥ २२८ ॥
पिष्ट्वा स्याद्रकज्जलीरूपं पीठीं प्रक्षाल्य सारजा ॥
प्रकारद्वयं संहृष्ट्वा पीठीगन्धकसम्भवा ॥ २२९ ॥
मृदुवर्त्तितपत्राणि पातालस्य गरुत्मना ॥
पिष्ट्यां पिष्टस्य क्षिप्त्वैनां पीठीं कृत्वा च गोलकम् ॥२३०॥
तं सरावपुटे क्षिपेत्सन्धिकर्पटमृत्स्नया ॥
नीरन्ध्रज्वलदङ्गारैः पुटं देयं च कौर्कुटम् ॥ २३१ ॥
स्वाङ्गशीतीकृतं चूर्णं प्रक्षिपेत्कुम्पके सुधीः ॥
रूप्यस्य च चतुःषष्टिर्गाल्या गद्याणकास्तथा ॥ २३२ ॥
तन्मध्ये चैकगद्याणं पीठीचूर्णे निवेशिते ॥
तिथिवर्णं भवेद्धेम निश्चितं नैष संशयः ॥ २३३ ॥
इति गन्धकजा पीठी चतुःषष्ट्यंशवेधिका ॥
हेमकर्तृणि कर्माणि जायन्ते सङ्गतानि वै ॥ २३४ ॥

आमलसारस्य गन्धकस्य गद्याणाः २० तथा शुद्धसूतस्य गद्याणाः २० एकत्र खरले मर्दयित्वा सूक्ष्मां कज्जलीं कृत्वा वस्त्रेण गालयित्वा ततो हेमवल्या गद्याणं कन्दानां श्रीखण्डेन वा रसेन वा गाढं संपिष्य पीठी कार्या एवं च प्रकारद्वयेन गन्धपीठी निष्पद्यते। ततः पातालगरुडस्य पत्राणि वर्त्तयित्वा पीठीं कृत्वा तन्मध्ये गन्धकपीठीं क्षिप्त्वा गोलकं च कृत्वा तं गोलकं सरावसम्पुटे क्षिप्त्वा सन्धौ कर्पटमृत्तिकां दत्वा ज्वलद्भिरङ्गारैः कुर्कटपुटं दत्वा स्वभावशीतलं गन्धकपीठीचूर्णं कुंपे क्षिपेत्। ततश्चतुःषट्टिगद्याणकेन रूप्यस्य गालयित्वा मध्ये एको

गन्धकपीठीचूर्णं गद्यपाणकं क्षिप्यते पञ्चदशवर्णिकं हेम भवत्येवेति । एवं गुरूपदेशेनापराण्यपि हेमकर्तृणि कर्माणि सिद्धयन्ति ।

इति गन्धकपीठी द्वितीया तथा कर्म्माणि च ।

अथ गन्धकतैलम्—

उत्कृष्टसार्जिका तुर्यमपानां सूक्ष्मचूर्णकम् ॥
क्षिप्त्वा स्थाल्यां हि संध्यायां कुम्भमानं जलं क्षिपेत् २३५॥
त्यक्तव्यं कावसम्मनीतार्यसज्जिकापयः (?) ।
उत्कृष्टाश्मना वेदास्तेषां चूर्णं तु सूक्ष्मकम् ॥ २३६ ॥
गन्धकामलसारस्य मणैकं सूक्ष्मचूर्णकम् ॥
क्षिप्त्वैकात्र हयुभे चूर्णे पिष्ट्वा चैकात्मतां नयेत् ॥ २३७ ॥
क्षिपेत्पञ्चमणान् स्थाल्यां यस्यां मतिघटद्वयम् ॥
स्वार्जिका जलमन्यस्यां मुक्त्वा चुल्योपरि क्षिपेत् ॥२३८॥
एरण्डतैलवत्तैलमुपर्यायायातिगन्धकम् ॥
तत्स्थाल्या मुहुरादाय क्षिपेच्छीतं च कूंपके ॥ २३९ ॥

सर्वोत्तमसाजीमणचतुष्कस्य चूर्णं स्थाल्यां क्षिप्त्वा संध्यायां जलघटस्तत्र क्षेप्यः । ततः प्रातः साजीजलं नीतार्यकावसंस्यत्क्वाग्राह्यम् तथा सर्वोत्तमपाषाणमणचतुष्कचूर्णं सूक्ष्मं तथा गन्धकामलसारस्य मणैकं चूर्णं सूक्ष्ममुभयं पिष्ट्वा एकत्र च गाढं पिष्ट्वा स्थाल्यां क्षिप्त्वा ततः प्रथमगृहीतं सर्जिकाजलमन्यस्यां स्थाल्यां मुक्त्वाल्पघटमानमुपरि क्षिपेत् । एवं च कृते गन्धकस्य तैलमेरण्डीतैलवदुपर्यागच्छति । ततश्च तैलं शीतलीभूतं सत्कुम्पके क्षेप्यम् ॥

इति गंधकतैलम् ॥

शुद्धमूतस्य गद्याणान् भूधरे दश विन्यसेत् ॥
गन्धतैलस्य गद्याणं दद्यात्कोडीयकं मुखे ॥ २४० ॥
सन्धौ वस्त्रं मृदा लिप्त्वा चतुर्भिः छाणकैः पुटम् ॥
दातव्यं चानया रीत्या वारं वारम्पुटं शतम् ॥ २४१ ॥
प्रक्षिपेत्तैलगद्याणं गन्धकं च पुटे पुटे ॥

मुखे कोडीयकं दद्यान्नवां वस्त्रमृदं मुहुः ॥ २४२ ॥
तैलं सूतेन सज्जीर्णं दशघ्नं गान्धकं शनैः ॥
हेमराजेस्ततो वल्या दश क्षेप्याः पुटे पुटे ॥ २४३ ॥
पूर्वरीत्या पुटं देयं तुर्यतुर्यैश्च छाणकैः ॥
हेमराजेश्च सूतेन कर्षो जीर्णश्चतुःपुटः ॥ २४४ ॥
शुद्धरूप्यस्य पत्राणि अमुना द्रवरूपिणा ॥
लिप्त्वा श्रावपुटे क्षिप्त्वा तत्संधिं वस्त्रमृत्स्नया ॥ २४५ ॥
लिप्त्वा भूमौ प्रदातव्यं छाणकैः कौर्कुटं पुटम् ॥
तिथिवर्णं भवेद्धेम कर्तव्या नैव संशयः ॥ २४६ ॥

इह शुद्धरसस्य गद्याणान् दश तथा गंधकतैलगद्याणकं च भूधरयन्त्रे विन्यस्य मुखे कोडीयकं दत्वा संधौ वस्त्रमृत्तिकया लिप्त्वा चतुर्भिः छाणकैः पुटं दातव्यम् । ततः पुनरपि तेष्वेव सूतस्य दशगद्याणकेषु गन्धकतैलगद्याणकं मुक्त्वा भूधरयन्त्रे विन्यस्य मुखे कोडीयकं दत्वा वस्त्रं मृत्तिकया सन्धौ लिप्त्वा चतुर्भिः छाणकैर्भूमौ कुर्कुटपुटं देयम् । एवं पुनः पुनः करणेन यदि सूतेन दशगुणं गन्धकतैलं जीर्णं भवति तदा पूर्वोक्ताया हेमराजेर्दश वल्लान् सूतमध्ये क्षिप्त्वा भूधरयन्त्रे विन्यस्य कोडीयकसंधौ वस्त्रमृत्तिकां च दत्वा चतुर्भिश्छाणकैः पूर्ववत् पुटं देयम् । एवं पुनः पुनः पुटचतुष्टयदानेन हेमराजेः कर्षे जीर्णे सति स सूतः संग्राह्यः । ततः शुद्धतारस्य पत्राणि तेन द्रवरूपेण तेन लिप्त्वा सरावसंपुटे तानि पत्राणि मुक्त्वा सन्धौ कर्पटमृदं दत्वा भूमौ छाणकैः कुर्कुटपुटं दीयते पञ्चदशवर्णं हेम भवति ॥

इति हेमकरणं प्रथमम् ।

भागा द्वादश रूप्यस्य तथा ताम्रस्य षोडश ॥
गालयेन्मिश्रितान् वज्रमूषायामष्टविंशतिम् ॥ २४७ ॥
खोटश्चन्द्रार्कनामा भृत्तस्य पत्राणि कारयेत् ॥
एकाङ्गुलानि संलिप्य जीर्णहेमाख्यराजिना ॥ २४८ ॥
तानि श्रावपुटे क्षिप्त्वा तत्सन्धिं वस्त्रमृत्स्नया ॥
लिप्त्वा भूमौ प्रदातव्यं छाणकैः कौर्कुटं पुटम् ॥ २४९ ॥

प्रकारेण द्वितीयेन हेमस्यातिथिवर्णकम् ॥
अथ पित्तलपत्राणि लिप्त्वा युक्त्यानया तथा ॥ २५० ॥
कौक्कुटेन पुटेनैव हेम स्यात्तिथिवर्णकम् ॥
एवं गन्धकतैलेन त्रिधा हेम प्रजायते ॥ २५१ ॥

रूप्यस्य भागा द्वादश ताम्रस्य भागाः षोडश एवमष्टविंशतिभागान् वज्रमूषायां क्षिप्त्वा गालयित्वा च चन्द्रार्कनामा षोटः कार्यः। ततस्तस्य षोटस्य पत्राण्येकांगुलप्रमाणानि कारयित्वा सरावसंम्पुटे मुक्त्वा सन्धौ वस्त्रमृदं दत्वा भूमौ छाणकैः कुर्कटपुटं दीयते। द्वितीयप्रकारेण पञ्चदशवर्णिकं हेम भवति। तथा पित्तलपत्राणि पूर्वोक्तयुक्त्या जीर्णहेमराजिसूतेन लिप्त्वा तथैव कुर्कटपुटे दत्ते पञ्चदशवर्णिकं हेम भवति। एवं त्रिभिः प्रकारैर्गन्धकतैलेन हेमनिष्पत्तिः।

इति गन्धकतैलकर्माणि।

नालं च गोस्तनाकारं मध्ये वर्त्तुलकैर्धृतम् ॥
वर्तुलां वज्रमूषां च पूर्वं कुर्याद्विचक्षणः ॥ २५२ ॥
दशघ्नं गान्धकं तैलं हेमराजेश्च कर्षकः ॥
येन जीर्णश्च तत्सर्वं मूषायां प्रक्षिपेद्रसम् ॥ २५३ ॥
छिपेच्च कङ्गुणीतैलं यथा ब्रुडति पारदः ॥
मूषामग्निपुटे ध्मायादङ्गारैः परिपूरिते ॥ २५४ ॥
यावत्तौल्यो हि सूतः स्यात्तत्तौल्यां हेमराजिकाम् ॥
गालयित्वान्यमूषायां वज्रमूषांतरे क्षिपेत् ॥ २५५ ॥
खोटो भूधविधानेन सहस्रस्य प्रवेधकः ॥
तारताम्रादिनागानां गद्याणानां सहस्रकम् ॥ २५६ ॥
प्रत्येकं पृथग्गाल्यानां तन्मध्ये षोटसम्भवः ॥
गद्याणैकपृथक् क्षेप्यो हेम स्यादुत्तमं पृथक् ॥ २५७ ॥

इह प्रथमं वर्त्तुलाकारां मूषां कृत्वोपरि गोस्तनाकारं नालं च कृत्वा वज्रे मूषा विधेया। ततो येन सूतेन पूर्वोक्तयुक्त्या दशगुणं गन्धकतैलं जीर्णं ततो हेमराजिकर्षश्च जीर्णं तं रसं वज्रमूषायां क्षि-

त्वोपरि कंगुणीतैलं तथा क्षिपेद्यथा स पारदो ब्रुडति। ततः सा मूषाऽग्निष्टके मुक्त्वा इंगालैर्धमितव्या। तथा यावन्मात्रः मूषायामस्ति तावन्मात्रां हेमराजिमूषायां गालयित्वा वज्रमूषास्थरसमध्ये क्षिपेत्। ततः सहस्रवेधी षोटो भवति स च संग्राह्यः। तथा तारस्य ताम्रस्यादिशब्दाद्वङ्गस्य च गद्याणसहस्रकं पृथक् पृथक् मूषायां गालयित्वा सहस्रवेधितस्यैकैको गद्याणकः पृथक् पृथक् सर्वषोटमध्ये क्षिप्यते सर्वाणि तारादीनि पृथक् हेम भवन्ति।

इति द्वितीयपरिणामगन्धकतैलकर्माणि ।

अथ गन्धकवारि ।

उत्कृष्टसार्जिकाक्षारमणानां सूक्ष्मचूर्णकम् ॥
सन्ध्यायां तु मणं स्थाल्यां कुम्भमानं जलं क्षिपेत् ॥२५८॥
प्रातस्त्यक्त्वा रसं शक्त्वा भूयोऽपि प्रक्षिपेन्मणम् ॥
एवं षट्त्वासरे कुर्यात् षण्मणं सार्जिकाजलम् ॥ २५९ ॥
नीता ये च जलं शेषमत्युच्छं कुरुते सुधीः ॥
गन्धकामलसारोऽपि वारिणा तेन पेषयेत् ॥ २६० ॥
तं च वारिनिभं कुर्यात्प्रक्षिपेत्कुंपके सुधीः ॥
कुम्भवस्त्रमृदावेष्ट्य दत्वास्ये चाम्रचातिकाम् ॥ २६१ ॥
अहोरात्रं ज्वलत्यग्निछन्ना यत्र च चूल्यके ॥
निक्षिप्य कुंपकं गर्भे रक्षा देया षडङ्गुलाम् ॥ २६२ ॥
निक्षिप्तश्चरहास्मोयन्नेकविंशतिवासरान् ॥
विलग्नः सार्जिकाक्षारः कुम्प्यन्तः परितो भ्रमन् ॥२६३॥
नालिकेरजलाभोभूत्पीततोयो हि गन्धकः ॥
हृतिपीठीति विख्यातं वारिगन्धकजं त्विदम् ॥ २६४ ॥

सर्वोत्तमसाजिमणनिषद्रसूक्ष्मचूर्णीकृत्य सन्ध्यायां मणमेकं साजिकुम्भ एको जलमिति स्थाल्यां क्षित्वा प्रातः कावससंत्यत्कानीतार्यजलं ग्रहीत्वा साज्ञोमर्णे क्षिपेत्(?)। एवं षड्दिनैः षट्मणान् क्षिप्त्वा नीवासर्जिकाजले अतिस्वच्छं कृत्वा आमलसारकगन्धकस्तेन जलेन

पिष्ट्वा वारिसदृशः कृत्वा कुम्भे क्षिप्त्वा कपटमृत्तिरावेष्ट्य मुखेऽभ्रकचातिकां दत्वा पत्रचुल्हके प्रच्छन्नोऽग्निरहोरात्रं ज्वलति तत्र चुल्हक कुपंनिक्षिप्य परितः षडंगुलप्रमाणा रक्षा देया सचकुम्पकस्तत्र निक्षिप्तः सप्तेकविंशतिदिनानि स्थापयित्वा कर्षणीयः। तावता च कालेन गन्धकः कुम्पमध्ये साजीक्षारेण सह भ्राम्यन् पीततोयो नालकेरजलसदृशो भवति । इदं च गन्धकवारिहृतिपीठीतिनाम्ना वार्त्तिकेन्द्रमध्ये विख्यातं ज्ञातव्यम्।

शुद्धसूतस्य चतुरो वल्लान् पिष्ट्वा घटीद्वयम् ॥
पीतेन वारिणा तेन भस्मीभवति पारदः ॥ २६५ ॥
शुद्धरूप्यस्य पत्राणि सूते चानेन लेपयेत् ॥
ध्मायाच्च वज्रमूषायां धमण्या च वत्क्रियाम्(?) ॥ २६६ ॥
रूप्यं कृष्णमयं जातं तस्याष्टौ गदीयाणकाः ॥
उत्कृष्टहेमगद्याणैः सूर्यसंख्यैः समन्विताः ॥ २६७ ॥
गालिता विंशतिः स्वर्णं भवेयुस्तिथिवर्णकम् ॥
कर्परे शुद्धसूतं च क्षिप्त्वाधो ज्वालयेन्मृदु ॥ २६८ ॥
अहोरात्रं मृदुवह्निमेकविंशतिवासरान् ॥
प्राकृतं गान्धकं वारि बिन्दुमात्रं क्षिपेन्मुहुः ॥ २६९ ॥
शुद्धसूतस्त्वहोरात्रमेकविंशतिवासरः ॥
एवं निष्पद्यते बन्ध्यः सूतः षोटश्च जायते ॥ २७० ॥

मृदु वर्त्तय पत्राणि पातालस्य गुरुत्मना ॥
पिंण्डयां पिष्टस्य ते षोटं क्षिप्त्वा कार्यो हि गोलकम्॥२७१॥
तं सरावपुटे क्षिप्त्वा सन्धिकर्पटमृत्स्नया ॥
वेष्टयित्वा पुटं देयं भूमौ कर्कुटसञ्ज्ञकम् ॥ २७२ ॥
निर्धूमैर्ज्वलदङ्गारैः षोटो भूत्पीतवर्णकः ॥
गालनीया चतुःषष्टिगद्याणाः शुद्धरूप्यजाः ॥ २७३ ॥
तन्मध्ये षोटगद्याणे क्षिप्तं स्यात्स्वर्णमुत्तमम् ॥
गान्धिकीह द्रुतिः पीठी चतुःषष्टिप्रवेधिका ॥ २७४ ॥

शोधितपारदस्य चत्वारो वल्लाः गंधकवारिणा घटीद्वयं यदि क्षिप्यन्ते तदा भस्मीभवंति। ततः शुद्धरूप्यस्य पत्राणि तेन भस्मना लिप्त्वा वज्रमूषायां तानि पत्राणि वंकलिधमण्या गाढं ध्मात्वा गालयेत्। ततः कृष्णं रूप्यं भवति। ततोऽस्य कृष्णरूप्यस्य गद्याणाः ८ सर्वोत्तमनवकहेमगद्याणाः १२ उभयं विंशतिगद्याणका गाल्यंते पंचदशवर्णिकं हेम भवति। तथा शुद्धरसं कर्परे क्षिप्त्वाधो मृद्वग्निं ज्वालयेत्। उपरि गंधकवारि बिन्दुना बिंदुना क्षिपेत्। एवमेकविंशतिदिनानि निरंतरं गंधकवारिणा सिक्तः सुस्रुतो निष्पद्यते बद्धः षोटश्च भवति। ततः पातालगरुडस्य पत्राणि वर्त्तयित्वा ततः पिडीं कृत्वा पिंडिमध्ये षोटं च क्षिप्त्वा भूमौ कुर्कुटसंज्ञं पुटं देयम्। परं निर्धूमैर्ज्वलद्भिरंगारैस्तथा च कृते स षोटः पीतो भवति तत शुद्धरूप्यस्य चतुःषष्टिगद्याणान् गालयित्वा षोटगद्याणको मध्ये क्षिप्यते। सर्वोत्तमं हेम भवात यत एषा गंधकद्रुतिपीठी चतुःषष्टिप्रवेधिका वर्त्तते।

इति गंधकद्रुतिपीठीकर्माणि।

अथ तालकशोधनम्।

गोदन्ती हरितालायास्तावत्पत्राणि दापय॥
यावन्न स्युर्द्विधा तानि दोलायन्त्रे क्षिपेत्ततः॥ २७५॥
अश्मचूर्णस्य या चालिभृतास्थाली तया दृढा॥
दोलायन्त्रे तथा कार्या वस्त्रं बुंधे लगेन्न हि॥ २७६॥
तज्ज्ञेन स्वेदनीयानि यामयुग्मं हठाग्निना॥
स्वेदनस्वेदनस्यांते जलेन क्षालयेत्तथा॥ २७७॥
निःसरंति यथा तेभ्यो नीलपीतादिकृष्णिकाः॥
सदैवातपशुष्काणि दोलायंत्रे परिक्षिपेत्॥ २७८॥
यंत्रे यंत्रे पुनस्तानि स्वेद्यानि प्रहरद्वयम्॥
लुणयुक्त्या तु नालेन द्विवेलं स्वेदयेत्ततः॥ २७९॥
तता दुग्धे गवादीनां स्वेदयेत्तत्क्रमेण च॥
कुष्मांडं खंडशः कृत्वा स्वेदयेत्तद्रसेन च॥ २८०॥
वर्त्तनीयानि साहायां वडवाप्याज्वलान्वितः॥

सुसूक्ष्माश्चंदनाकाराः स्वेदयेत्तद्रसेन च ॥ २८१ ॥
शोधनैः पंचभिः शुद्धा गोदंती निर्विषीभवेत् ॥
हृदुक्लेदमशुद्ध्या सा घूर्णारं चं करोति च ॥ २८२ ॥
तापं च नाडिसंकोचमंतस्तापं करोति च ॥
अतः प्रागेव संशुद्धा हरितालाऽमृतोपमा ॥ २८३ ॥

गोदंती हरितालायास्तावत्पत्राणि कार्याणि यावत्पुनर्द्विधा न भवंति। ततस्तानि पत्राणि पाषाणचूर्णस्याछिभृतायां स्थाल्यां दोलायंत्रे च टापयित्वाऽधो हठाग्निना प्रहरद्वयेन स्वेदनीयानि। तत उत्तार्य जलेन क्षालयित्वा आतपे शोषयित्वा लुणयुक्तकांजिकपूर्णस्थाल्यां दोलायन्त्रे च टापयित्वा हठाग्निना प्रहरद्वयेन स्वेदनीयानि । पुनरुत्तार्य जलेन प्रक्षाल्य गवादिदुग्धेन पूर्णस्थाल्या स्वेदयेत्प्रहरद्वयम्। ततो जलेन प्रक्षाल्यातपे शोषयित्वा कुष्मांडफलं खंडशः कृत्वा तद्रसेन पूर्ववत्प्रहरद्वयं स्वेदनीयानि । ततः पयसा प्रक्षाल्यातपे शोषयित्वा वडवाईका निसाहायां वर्त्तयित्वा तद्रसेन यामद्वयं पूर्ववत् स्वेद्यानि एवं पंचभिः शोधनैः शुद्धहरिताला निर्विषीभवति। यावच्च सा न शोध्यते तावत्सा दत्ता सती हृदयस्य क्लेदं धूर्मं रेचं तापं नाडिसंकोचमंतर्दाहं च करोति। अतः पूर्वं सा शोधिता अमृतसमाना भवति।

इति गोदंतिहरितालायाः शोधनविधिः।

अथ शुद्धतालककर्म्माणि।

शुद्धसूतस्य चत्वारि शुद्धतालस्य विंशतिम् ॥
क्षिप्त्वा छागीवसायाश्च पलिकार्धे मुहुर्मुहुः ॥ २८४ ॥
चतुर्विंशतिगद्याणान् खल्वे पिष्ट्वैकवासरम् ॥
तत्सर्वं कुंपके क्षिप्त्वा मुखे कर्परचातिकाम् ॥ २८५ ॥
दत्वा वस्त्रमृदा लिंपेत्कुंपकं वस्त्रमृत्स्नया ॥
आकंठं सप्तधावेष्टयं चुल्यंतः प्रक्षिपेच्च तम् ॥ २८६ ॥
संकीर्णोच्चतरा चुल्ही तथा कार्या नवीनका ॥
दोलायंत्रवदाभाति कुंपार्धं चुल्हके यथा ॥ २८७ ॥
कुंपकादर्धश्च यामैकं वह्निर्योज्यो मृदुस्ततः ॥

ज्वालनीयो दृढो वह्निर्यावद्यामचतुष्टयम् ॥ २८८ ॥
सत्वं प्रोड्डीयसूतश्च कुंपकंठे लगिष्यति ॥
ततस्तं कुंपकं भंक्त्वा कंठाद् ग्राह्यं समग्रकम् ॥ २८९ ॥
क्षिप्त्वा स्थालीवसायाश्च पलिकार्धं प्रतिक्षणम् ॥
सप्ताहं प्रसहं पिष्ट्वा नवीने कुंपके क्षिपेत् ॥ २९० ॥
सप्तधा सप्तभिः कुंपैः कार्यः प्राग्विहितो विधिः ॥
ततः सप्तमवेलायां कृष्णत्वं याति कंठके ॥ २९१ ॥
कुंपबंधे रहंत्येव ये वारिसदृशाः कणा ॥
सत्वभूताश्च ते सर्वे ग्राह्याः कार्यविवर्जिताः ॥ २९२ ॥
तोलयित्वा ततस्तस्माद्विगुणं शुद्धपारदम् ॥
यामं खल्वे द्वयं पिष्ट्वा निंबुकेन रसेन च ॥ २९३ ॥
वारं वारं च प्रक्षेप्यो मर्दने नैंबुको रसः ॥
ततः सा पिठिका जाता सूततालकसंभवा ॥ २९४ ॥
स्थालिकायां च तां पीठीं कांजिकं लवणान्तिकम् ॥
निंबुकानि च खण्डानि प्रक्षिप्य स्वेदयेद्दिनम् ॥ २९५ ॥
नष्टं नष्टं मुहुः क्षेप्यं कांजिकं लवणान्वितम् ॥
स्वेदोत्तीर्णा च सा पीठी संशोष्या चातपे दृढा ॥ २९६ ॥
पीठीं तां टंकणक्षारं समतुल्यं च पेषयेत् ॥
मीणपूपाद्वयं कृत्वा चैकस्यां पीठिकां क्षिपेत् ॥ २९७ ॥
द्वितीयां चोपरि दत्वा कार्या वेढिनिका बुधैः ॥
यावत्तौल्या हि सा पीठी तत्तौल्यं शुद्धरूप्यकम् ॥२९८॥
गालयेद्वज्रमूषायां वेढनीं चोपरि क्षिपेत् ॥
दह्यते टंकणक्षारो मीणे ध्माते दृढे सति ॥ २९९ ॥
तालरूप्यं भवेत्पोटः श्वेतशंखस्य सन्निभः ॥
ताम्रस्यैव चतुःषष्टिः गालयेद्वदीयाणकान् ॥ ३०० ॥

तन्मध्ये षोटगद्याणे क्षिप्ते रूप्यं भवेद् ध्रुवम् ॥
षोटोऽभूत्तालरूप्योऽयं चतुःषष्टिप्रवेधकः ॥ ३०१ ॥

यः करोति रतिमात्रं प्रत्यहं प्रातरुत्थितः ॥
षडाभिर्मासैः प्रणश्यन्ति अष्ट कुष्ठा दशापि हि ॥ ३०२ ॥

उद्गच्छंति नवा दंताः केशाः कृष्णा भवन्ति च ॥
पलितं मूलतो याति वलिनाशो भवेद् ध्रुवम् ॥ ३०२ ॥

शुद्धसूतस्य गद्याण ४ शुद्धतालस्य गद्याण २० एवं चतुर्विंशतिगद्याणान् खल्वे प्रक्षिप्य तथा छालीवसायाः पलिकार्धं च प्रक्षिप्येकं दिनं पिष्ट्वा तत्सर्वं कुंपके क्षिप्त्वा मुखे कर्परचातिकां दत्वा आकंठं सप्तभिः कर्पटमृत्तिकाभिः कुम्पकमावेष्टय संकीर्णामुच्चां च चुल्हीं कृत्वोपरि कुम्पको यथा दोलायंत्रो दृश्यते तथा मोक्तव्योऽधश्च प्रहरमेकं प्रथममृदुवन्हिर्ज्वालनीयस्ततो याम ४ हठाग्निः । तावता च तालकसत्वं प्रोड्डीय कुम्पकंठे लगति । ततः कुम्भं त्यत्क्वा कंठकात्तत्सर्वमादाय खरले क्षिप्त्वा छालीवसापलिकार्धेन दिनमेकं मृदित्वा द्वितीये कुंपके क्षिप्त्वा सप्तभिर्वस्त्रमृत्तिकाभिर्लिप्त्वा संकीर्णोच्चचुल्हिकायामारोप्य पूर्ववदधोऽग्निर्ज्वालनीयः । एवं पुनः छालीवसापलिकार्धेन खरले पिष्ट्वा तृतीयकुंपके पूर्ववत्संकीर्णाच्च चुल्हिकायां सर्वं कार्यं ततो यदि सप्तभिः कुंपकैः सप्तवारमेवं संस्कृतं तद् भवति तदा कालिका कंठकेयाति कुंपबुधे च जलसदृशा येकणास्तिष्ठंति ते तालकसत्वरूपाः कालिकवर्जिता ग्राह्याः । ततस्तं तालकसत्वं तोलयित्वा तस्माद्द्विगुणं शुद्धपारदं चोभयं खरले क्षिप्त्वा निंबुकरसेन मृदित्वा सुतप्तालकसंभवा पीठी कार्या मर्दने च निंबुकरसः पुनः पुनः क्षेप्यः । ततस्तां पीठीं वस्त्रे बध्वा लवणयुक्तकांजिकपूर्णस्थालिकायां निंबुकखंडानि प्रक्षिप्य दोलायंत्रेण दिनमेकं स्वेदयेत् । लवणकांजिकं च नष्टं नष्टं मुहुर्मुहुः क्षेप्यं ततः स्वेदोत्तीर्णां तां पीठीमातपे संशोष्य तत्तुल्यं टंकणक्षारं । तां च पीठीं पिष्ट्वा ततो मीणपूपाद्वयं कृत्वैकस्यां पूपायां पीठीं क्षिप्त्वा द्वितीयां चोपरि दत्वा वेढिनिकां कृत्वा ततो यावन्मात्रा सा पीठी तावन्मात्रं शुद्धरूप्यं वज्रमूषायां गालयित्वोपरिवेढनी क्षिप्यते । ततोऽधो दृढं ध्माते मीणटंकणक्षारश्च दह्यते । तालं

रूप्यस्य खोटो भवति। ततः शुद्धताम्रस्य चतुःषष्टिगद्याणकान् गालयित्वा एकखोटगद्याणो मध्ये क्षिप्यते सर्वोत्तमं रूप्यं भवति। अयं तालरूप्यखोटस्य चतुःषष्टिप्रवेधको ज्ञेयः। तथा प्रतिदिनं प्रभाते उत्थाय यो रतिमात्रं षोटं कुरुते तस्य षड्भिः मासैरष्टादशकुष्ठानि प्रणश्यंति। नवा दन्ता उद्गच्छन्ति केशाः कृष्णा भवन्ति पलितानि यांति वलिनाशः स्यात्।

इतितालककर्माणि ॥

अथाभ्रकस्य त्रिविधा द्रुतिः ॥

कोद्रवा व्याघ्रमदनास्तेषां पीषय सेतिकाम् ॥
पिष्टमध्यात्सुसूक्ष्मं च ग्राहयेन्माणकद्वयम् ॥ ३०३ ॥
कांजिकं स्थालिकायां च क्षिप्त्वाऽऽकंठं क्षिपेज्जलम् ॥
अतीवाम्लं भवेत्तच्च ह्यतीतैः सप्तवासरैः ॥ ३०४ ॥
विधिनानेन कर्त्तव्यं चात्यम्लं द्वितीयं जलम् ॥
मणं श्वेताभ्रकं चूर्णं संयुक्तं तेन वारिणा ॥ ३०५ ॥
प्रक्षिप्योलूखले कुट्यं यामधान्याभ्रकं भवेत् ॥
जले धान्याभ्रकं तस्मिन्नेकविंशतिवारकान् ॥ ३०६ ॥
बुडच्च राहयित्वाथ संशोष्यं चातपे पुनः ॥
राला स्यात् टंकणक्षारो लवणं कणगुग्गुलः ॥ ३०७ ॥
प्रत्येकं मणद्वीपांशं चतुर्णां मिलितो मणः ॥
तिलानां पलगद्याणा विंशतिश्च गुडस्य च ॥ ३०८ ॥
वल्लानां पल्लिकापीठी द्वौ कर्षौ मधुदुग्धयोः ॥
युक्तं धान्यभ्रकेनैव क्षोदनीयं मुहुर्मुहुः ॥ ३०९ ॥
दश गद्याणका मात्राः पूपाः कार्या अनेकशः ॥
क्षिप्त्वैकां राक्षसे यंत्रे तमंगारैश्च पूरयेत् ॥ ३१० ॥
एकस्यां गालितायां च द्वितीयां प्रक्षिपेत्सुधीः ॥
यामैर्गाल्याः क्रमात्सर्वाः स्वांगशीताः समुद्धरेत् ॥३११॥

तासां मध्यात् समाकृष्यात् द्युतिरभ्रकसंभवा ॥
सुखेनाप्यनया युक्त्या द्युतिर्धान्याभ्रकाद्भवेत् ॥ ३१२ ॥

व्याघ्रमदनाख्यकोद्रवानां सेतिकां पिष्ट्वा तन्मध्यान्माणकद्वयं सुसूक्ष्मचूर्णमादाय स्थाल्यां क्षिप्त्वोपरि कांजिकं तथा जलं चाकंठं क्षिपेत्। तच्च सप्तभिर्दिनैरत्यम्लं भवति तथानेन विधिना शेषमाणद्वयेनात्यर्थमम्लं जलं कृत्वा एकशः कार्यम्। ततः श्वेताभ्रकमणचूर्णं तेनाम्लजलेन सहोलूखले याममेकं कुट्टयित्वा तस्मिन्नेवजले ब्रूडत् २१ दिनानि राहयित्वा पश्चादातपे शोषयित्वा ततो रालाटंकणक्षारौ लवणं कणगुग्गुश्चेति चतुर्णामौषधानां प्रत्येकमणचतुर्थांशं तथा तिलस्य गद्याणा २० गुडस्य गद्याणा २० वल्लपीठीपाली १ मधुकर्ष १ दुग्धकर्ष १ एतत्सर्वमेकत्र कृत्वा धान्याभ्रकेण सह मुहुर्मुहुः क्षोदयित्वा गद्याणकदशकमात्राः अनेकपूपाः कृत्वा राक्षसे यंत्रेऽगारान् क्षिप्त्वा एकां पूपां मुंचेत्। एकस्यां च गलितायां द्वितीयां क्षिपेत्। एवं प्रहरेणैकेन सर्वा अपि गालनीया। ततः स्वयं शीतलाः पूपाः समुद्वृत्य तासां मध्याद् धान्याभ्रकसंभवा द्युतिर्ग्राह्या। अनया युक्तया सुखेनापि धान्याभ्रकद्युतिर्भवति।

इति धान्याभ्रकद्युतिकरणं प्रथमम् ॥

श्वेतधान्याभ्रकं चूर्णं गद्याणद्वयसंमितम् ॥
क्षिप्त्वा दुग्धपलीमध्ये पातव्यः सेहुलो मुहुः ॥ ३१३ ॥
कोष्टिकायासवे क्षेप्यो याति सोन्यत्रतो यथा ॥
पीत्वा पीत्वा ही तद्दुग्धं पुरीषं तत्र मुंचति ॥ ३१४ ॥
सर्वं ग्राह्यं पुरीषं तदतीतैर्बहुभिर्दिनैः ॥
तत्तोलयित्वा चतुर्थांशं टंकणक्षारजं क्षिपेत् ॥ ३१५ ॥
तत्पिष्ट्वाज्यमधुभ्यां च कृतं लेपस्य सन्निभम् ॥
तेन तुंबीनलीयंत्रमध्यं लेप्यं दृढं खलु ॥ ३१६ ॥
इंगालैः पूरयित्वा तां धमण्या वक्रवक्त्रया ॥
ध्मातव्या याममेकं च सात्ववाङ्मुखकुंपिका ॥ ३१७ ॥
लेपस्फेटं द्युतिर्जाताश्वेतधान्याभ्रकोद्भवा ॥

द्वितीयपरिणा तज्ज्ञैः कर्त्तव्या चाभ्रकी द्रुतिः ॥ ३१८ ॥

श्वेतधान्याभ्रकचूर्णं गद्याणद्वयमध्ये दुग्धपली १ क्षिप्त्वा सेहुलकः पात्यते । स च सेहुलकः कोठीमध्ये क्षिप्यते । यथान्यत्र न याति ततः पुनः श्वेतधान्याभ्रकगद्याणद्वयं मध्यक्षिप्तं दुग्धं पाय्यते एवं बहुभिर्दिनैः पुनः पुनस्तस्य पाने सेहुलकेन यत्पुरीषं मुक्तं भवति तत्सर्वं तोलयित्वा चतुर्थभागेन मध्ये टंकक्षारं क्षिप्त्वा घृतमधुभ्यां पिष्ट्वा लेपसदृशं कृत्वा तेन लेपेन पूर्वकथिततुंबीनलयंत्रमूलं लिप्त्वा लोहालकैर्वंकनालीधमण्या सोऽधोमुखं कुंपको यंत्रो ध्मातव्यः । ततः स लेपो द्रुतिरूपो भवति ।

इति द्वितीयपरिणा धान्याभ्रकद्रुतिः ॥

भ्रमद्भिर्दृश्यते क्वापि भावेन शशको मृतः ॥
तस्य मस्तकमध्याच्च गृहीतव्यो हि मेचकः ॥ ३१९ ॥
धान्याभ्रकस्य गद्याणान् चत्वारिंशत्प्रपीषयेत् ॥
तन्मध्यान्मेचकोन्मानं चूर्णं प्रक्षिप्य मेचके ॥ ३२० ॥
द्वयं संमर्द्य संमर्द्य पिंडं कृत्वा दृढं ततः ॥
घृततैलादिना दिग्धा स्थालिकायां क्षिपेच्च तम् ॥ ३२१ ॥
प्रध्वरा ढंकणी देया नीरंध्रा वस्त्रमृत्स्नया ॥
कणीनां कोष्ठके क्षेप्यो रहाप्याहस्त्रिसप्तकम् ॥ ३२२ ॥
तन्मध्ये कृमयो जाता निशं भक्ष्यन्ति चाभ्रकम् ॥
तापे च मेचका भावे म्रियंते च बुभुक्षया ॥ ३२३ ॥
विपन्नासु च सर्वासु शेषं धान्याभ्रकी द्रुतिः ॥
तृतीयपरिणा तज्ज्ञैः ख्याता धान्याभ्रका द्रुतिः ॥३२४॥
विख्याता युक्तयस्तिस्रश्चतुर्थी नोपपद्यते ॥
तिसृणां यानि कर्माणि वक्ष्यंते तानि सांप्रतम् ॥३२५॥

स्वेच्छया मृतः शशको भ्रमद्भिर्यदि दृश्यते तदा तस्य मस्तकमध्यान्मेचकं गृहीत्वा धान्याभ्रकस्य गद्याणा ४० गाढं पेषयित्वा तन्मध्याद् मेचकमात्रं चूर्णं मेचकमध्ये क्षिप्त्वा द्वयं मृदित्वा पिंडं च कृत्वा

घृतेन तैलेन वा लिप्तस्थालिकामध्ये तं पिंडं क्षिप्त्वा उपरि प्रध्वरां ढंकणीं दत्वा पार्श्वेषु सर्वत्र वस्त्रमृत्तिकाभिर्निश्छिद्रीकृत्य सा स्थाली कणकोष्टकध्ये क्षिप्त्वा २१ दिनानि स्थाप्या तावता च मेचकमध्ये ये कृमयो जायंते तेऽभ्रकं भक्षयित्वा पश्चादू बुभुक्षया तापेन च म्रियंते। ततस्तेषु कृमिषु मृतेषु यत्तत्र शेषं मुहुरति सा धान्यभ्रकद्रुतिः।

इति तृतीयपरिणा धान्याभ्रकद्रुतिः।

द्रुतिकरणेऽभ्रकस्यैत एव त्रयो भेदाः॥

अथामीषां कर्म्माणि वक्ष्यन्त—

शुद्धसूतस्य गद्याणान् वज्रमूषांतरे दश॥
क्षिप्त्वा तां वालुकायंत्रे मृद्वग्निं ज्वालयेदिनम्॥ ३२६॥
क्षिपेब्दिन्दुमहोरात्रं मुहुर्भूनागसत्वजम्॥
वक्रं सूतस्य जायेत दत्तं सर्वं च जीर्यति॥ ३२७॥
निसाहायां प्रपेष्टव्या चिल्हा चातीव सूक्ष्मका॥
निश्चोत्यैव रसो ग्राह्यो वस्त्रशुद्धोऽतिनिर्गुलः॥ ३२८
यस्मिन् वारिपलं माति तन्मात्रे कांतपात्रके॥
जातवक्त्रस्य सूतस्य क्षेप्या गद्याणका दश॥ ३२९॥
द्रुतित्रयांतरेकस्या गद्याणांश्च क्षिपेद्दश॥
ततश्चिल्हा जलापूर्णमाकण्ठे कांतपात्रकम्॥ ३३०॥
तच्च कांतायसं पात्रं यन्त्रे वालुकके क्षिपेत्॥
अहोरात्रं मृदुं वह्निं तदधो ज्वालयेन्मुहुः॥ ३३१॥
द्वयोरैक्येण निष्पन्नो वज्रपोटोयमद्भुतः।
क्षिप्त्वा तं वज्रमूषायां ध्यायादिंगालकैः सुधी॥ ३३२॥
शुद्धरूप्यस्य गद्याणान्मध्ये प्रक्षिप्य विंशतिम्॥
गालयेत्सुदृढं पश्चात्समुत्तारयति श्रितान्॥ ३३३॥
अक्षयो नाम तेजोवान्निश्चलश्चातिनिर्म्मलः॥
गुरुर्जातोथ भग्नश्च भज्यते स हि खोटकः॥ ३३४॥

गालयेद्वज्रमूषायां वङ्गगद्याणकं शतम् ॥
तन्मध्ये षोटगद्याणे क्षिप्ते रूप्यं भवेद् ध्रुवम् ॥ ३३५ ॥
त्रिधाभ्रकद्रुतेः कर्म्म वंगे स्याच्छतवेधकम् ॥
षोटमध्याद् रतिमात्रं यः करोति सदा नरः ॥ ३३६ ॥
षड्भिर्मासैः स जायेत सुतेजा निर्मलोऽक्षयः ॥
खोटोयं भुवि विख्यातो लोहदेहकरो ध्रुवम् ॥ ३३७ ॥

शुद्धरसस्य दश गद्याणान् वज्रमूषामध्ये प्रक्षिप्य तां मूषां वालुकायन्त्रे चटाय्य दिनमेकं मृद्वग्निं ज्वालयेत् । उपरि भूनागसत्वस्य बिन्दुं बिन्दुं पुनः पुनः क्षिपेत् । ततो रसस्य मुखं जायते । सर्वदत्तं जीर्यते । ततो निसाहामतिसूक्ष्मां चिल्हां प्रपिष्य वस्त्रेण निश्चोत्य रसो ग्राह्यः । ततो यस्मिञ्जले पलं याति तावन्मात्रं कान्तपात्रमाकण्ठं पूरयित्वा कान्तपात्रं वालुकायन्त्रे चटायित्वाऽधोमृदुरग्निः पुनः पुनरहोरात्रं ज्वालनीयः । ततोभ्रकद्रुतिसूतयोरैक्येण वाभ्रषोटो जायते । ततस्तं षोटं वज्रमूषायां प्रक्षिप्य गद्याण २० मध्ये प्रक्षिप्य गाढं गालयित्वा समुत्तारयेत् । ततोऽयमक्षयो निर्मलस्तेजोवान् गदीयाणः क्षिप्यते । सर्वोत्तमं रूप्यं भवति । असौ वंगे शतमध्ये वेधको रसः तथायः सदा प्रभाते रतिमात्रं षोटं करोति । स षड्भिर्मासैरक्षयनीरोगदेहो जायते ।

इति त्रिविधाभ्रकद्रुतिकर्माणि ।

अथ भूनागः ।

उत्कृष्टस्वर्णगद्याणान् गालयेच्चतुरः सुधीः ॥
जरकीशदलानीव तेषां पत्राणि कारयेत् ॥ ३३८ ॥
नृकपालोद्भवं चैकं पलं धत्तूरमूलजम् ॥
चंदनं च पृथक् धृष्ट्वा तुल्यमेकत्र मिश्रितम् ॥ ३३९ ॥
क्षिपेच्छ्रीषण्डमध्ये च गद्याणं वज्रभस्मनः ॥
खल्वे सम्पेषयेत्तावद्यावदेकात्मतां भजेत् ॥ ३४० ॥
हेमपत्राणि तेनैव लेपयेत्सुदृढानि च ॥
गद्याणं चांधमूषायां क्षिपेद् भूनागसत्वजम् ॥ ३४१ ॥

हेमपत्राणि तत्रैव क्षिप्त्वा मूषां यदृच्छया ॥
कोष्टिकाग्निष्टगर्त्तासु त्रिवेलम्पूरितां मुहुः ॥ ३४२ ॥
वक्त्रवक्त्रधमण्यायां धमापयेन्मृतजीविभिः ॥
हेमवज्रात्मकः षोटो भवेद् भूनागसत्वजः ॥ ३४३ ॥
अर्त्तयित्वा च तं षोटं चूर्णं कार्यं सुसूक्ष्मकम् ॥
काचकुंपीमथाकण्ठं सप्तधा वस्त्रमृत्स्नया ॥ ३४४ ॥
वेष्टयित्वा च तन्मध्ये प्रथमं कर्षमात्रकम् ॥
क्षिपेद् भूनागजं सत्वं तन्मध्ये शुद्धपारदम् ॥ ३४५ ॥
षट् गद्याणांस्ततो दद्याद्यंत्रे वालुकके क्षिपेत् ॥
चुल्ल्यामारोप्य तं यन्त्रं ह्यधोऽग्निं ज्वालयेद्धठात् ॥ ३४६ ॥
नष्टं नष्टं मुहुः क्षेप्यं सत्वं भूनागसम्भवम् ॥
सत्वेन द्रवरूपेण मृता धार्या च कुंचिका ॥ ३४७ ॥
अहोरात्रं रसः स्वेद्यः सुधिया सप्तवासरम् ॥
इत्थं स्विन्नाः षडेवैते स्वेदिताः शुद्धसूतजाः ॥ ३४८ ॥
वक्त्रं सूतस्य संजातं सूतो जातश्च राक्षसः ॥
षट् गद्याणाः कृताः पूर्वहेमवल्ल्यादिसत्वजाम् ॥ ३४९ ॥
चतुःषष्टितमं चांशं तेषां मध्यान्मुहुर्मुहुः ॥
क्षिप्त्वा खत्वेपि सूतांतः पिष्ट्वा पिष्ट्वा शनैः शनैः ॥३५०॥
जारणीयाः षडेवैते शेषाः षट् सूतजाः स्थिताः ॥
उत्कृष्टसूतगद्याणाः षडेताभिश्च मिश्रिताः॥ ३५१ ॥
गाल्या द्वादशमूषायां षोटः स्याच्छतवेधकः ॥
रूप्यताम्रादिनागानां गद्याणानां शतं शतम् ॥ ३५२ ॥
त्रयाणां च शतैकस्मिन् प्रत्येकं गालिते पृथक् ॥
तन्मध्ये षोटगद्याणं प्रत्येकं च पृथक् क्षिपेत् ॥ ३५३ ॥
त्रिषु धातुषु हेमस्यान्निश्चितं तिथिवर्णकम् ॥

षोटमध्याद्रतीमात्रं प्रगेऽमृतकलान्वितम् ॥ ३५४ ॥
आदत्ते नियतं वेलं वलिस्तस्य न जायते ॥
पलितं मूलतो याति कृष्णाः केशा भवंति च ॥ ३५५ ॥
शरीरे जायते दार्ढ्यं शरीरं क्षीयते न हि ॥
देहकांतिः सुवर्णाभा नित्यं षोटस्य सेवनात् ॥ ३५६ ॥
हेमवज्रादिभूनागसत्त्वैर्निष्पादितास्त्रिभिः ॥
देहकृच्छतवेधी च षोटो जातोऽयमद्भुतः ॥ ३५७ ॥

पंचदशवर्णिकं सुवर्णगद्याणान् चतुरो गालयित्वा जरकोशदलवत्कंटकवेध्यानि पत्राणि कुर्यात् । ततो नरकपालं तथा धत्तूरकमूलं च पृथक् पृथक् घृष्ट्वा समभागेन एकीकृत्य पूर्वसाधितहीरकभस्मनो गद्याण एकस्तन्यध्ये क्षेप्यः । ततः खरले क्षिप्त्वा सर्वं तावत्पेषयेत् यावदैकात्म्यं प्राप्नोति ततस्तेन हेमपत्राणि लिप्त्वा अंधमूषायां क्षिप्त्वोपरि भूनागसत्वगद्याणं च मुत्क्वा प्रथमं कोष्ठिकायां लीहालकैर्भृत्वा वक्रनालीधमण्या धमेत् । ततोऽग्निष्टके लीहालकैर्धमेत् । ततो गर्त्तायां लीहालकैर्धमेत् । एवं त्रिवेलं ध्मातः सन्नसौ हेमवज्रभस्मभूनागसत्वजः षोटो भवति । ततस्तं षोटं मर्दयित्वा सूक्ष्मं चूर्णं कार्यम् । ततः काचकुम्पीमाकण्ठं सप्तभिः कर्पटमृत्तिकाभिरावेष्ट्य प्रथमं कर्षमात्रं भूनागसत्वं तथा शुद्धपारदस्य षड् गद्याणकांश्च प्रक्षिप्य वालुकायन्त्रे तां कुम्पीमारोप्याधो हठाग्निर्ज्वालनीयः । भूनागसत्वं च नष्टं पुनः क्षेपणीयम् । किं बहुना सप्तदिनानि निरंतरं कुम्पिकाभूनागसत्वेन भृतैव धारणीया । यथा षट्पंचाशद्भिः प्रहरैः शुद्धसूतषड्गदीआणका गाढं विध्यते । ततस्तस्यमुखं जायते स च सूतो राक्षसनाम जायते सर्वभक्षक इत्यर्थः ततः पूर्वं यो हेमवज्रभूनागसत्वषोटो वर्त्तयित्वा चूर्णितोऽस्ति तन्मध्याच्चतुःषष्टितमं भागं गृहीत्वा खरले राक्षससूतमध्ये क्षिप्त्वा पिष्ट्वा पिष्ट्वा जारणीयः । ततः पुनश्चतुःषष्टितमो भागस्तत्र पिष्ट्वा जारणीयः । एवं पुनः पुनश्चतुषष्टितमषोटभागजारणेन षड् गद्याणाः षोटस्य जारणीयाः । ततो राक्षससूतषड्गदीयाणमध्ये शोधितोत्कृष्टपारदगदीआणान् षट् मेलयित्वा ते द्वादशगदीआणा मूषायां प्रक्षिप्य गालनीयाः । शतवेधकः षोटो भवति । ततो रूप्यस्य ताम्रस्य नागस्य वा गदीयाणकशतं गालयित्वा षोटगदीया-

णाः क्षिप्यते । पंचदशवर्णिकं हेम भवति । त्रिषु धातुषु शतवेधको-ऽयं रसः । तथा प्रभाते नित्यममृतकलया युक्तं षोटचूर्णं रतीमात्रं कुरुते । तस्य वलिपलितादिदोषा नश्यन्ति । कृष्णाश्च केशा भवन्ति । देहदार्ढ्यं जायते । सुवर्णाभा शरीरकांतिर्भवति । हेमपत्रैर्वज्रभस्म नागसत्वेन त्रिभिः साधितोयं षोटो देहकारको लोहकारकश्च ॥

इति हेमवज्रभस्मभूनागसत्वकर्माणि ॥

श्रीभैरवगणाध्यक्षश्रीवाणीभ्यो नमः सदा ॥
यत्प्रसादाद्धि सिध्यंति गुटिकांजनपारदाः ॥ ३५८ ॥
संख्याशीतिः सतुर्या स्यात्प्रत्येकं च पृथक् त्रिषु ॥
एवं संख्यात्रयाणां स्याद्विपञ्चाशत्शतद्वयम् ॥ ३५९ ॥
एतस्याः सर्वसंख्याया मध्यादेकस्य कस्यचित् ॥
आरम्भादौ फलान्ते च तपः कुर्यादखण्डितम् ॥ ३६० ॥
अवाङ्मासैकतः पूर्वं निष्पत्तेरा फलादपि ॥
ब्रह्मचर्यं भुवि स्वापं हविष्यान्नं च भोजनम् ॥ ३६१ ॥
तपोविधिषु सिध्यन्ति तपःसाध्या रसादयः ॥
दोषं दैवस्य यच्छन्ति तपोहीना हि साधकाः ॥ ३६२ ॥
वार्त्तोक्ता गुटिकास्तेन श्रीकंकालययोगिना ॥
गुटिं ज्ञानफलां वक्ष्ये द्विपञ्चाशत्सुवल्लिका ॥ ३६३ ॥
चत्वारोऽभ्रकसत्वस्य चत्वारः स्वर्णमाक्षिकात् ॥
शुद्धरूप्यस्य चत्वारो वल्लैको हेमराजिकाः ॥ ३६४ ॥
शुद्धोऽष्टादशसंस्कारैः पूर्वो यस्तु पारदः ॥
तस्यैकोनचत्वारिंशद्द्विपञ्चाशच्चमीलिताः ॥ ३६५ ॥
खल्वे प्रक्षिप्य सर्वास्तान्मर्दयेदिनसप्तकम् ॥
वरुणस्य तरोर्भूतश्रीषडमूक्ष्मकं मुहुः ॥ ३६६ ॥
मृद्वग्नौ स्वेदयेत्तेन दोलायन्त्रे दिनद्वयम् ॥
स्वेदयेत्तद्गुटीं कृत्वा क्रमात्पञ्चामृतेन च ॥ ३६७ ॥

मध्वाज्यं दधि दुग्धं च शर्करा चेति पञ्चमी ॥
अस्मिन् पञ्चामृते स्वेद्या यामाष्टाष्टा मृतं प्रति ॥ ३६८ ॥
कान्तलोहमये पात्रे मधुना च गुटीं क्षिपेत् ॥
तत्पात्रं वालुकापूर्णं स्थालिकान्तश्च विन्यसेत् ॥ ३६९ ॥
चुल्ह्यां स्थालीं चटाय्याग्निं यामाष्टौ ज्वालयेदधः ॥
स्वेदनेऽयं विधिः कार्यः स्तोकके चामृते क्रमात् ॥ ३७० ॥
नष्टे नष्टे मुहुः क्षेप्यं क्रमात्पञ्चामृतं सदा ॥
मधुयुक्तिक्रमेणैव पञ्चधा स्वेदयेद् गुटीम् ॥ ३७१ ॥
तपोनिष्ठः क्रियावांश्च हस्ताभ्यां तां प्रचालयेत् ॥
निष्पन्ना गुटिका कार्या द्विपञ्चाशत्सुवल्लिका ॥ ३७२ ॥
यस्याः शुद्धावुभौ पक्षौ प्रसूता चोत्तमे कुले ॥
ब्राह्मणी क्षत्रिया वापि वैश्यी चैवंविधा च या ॥ ३७३ ॥
शूद्रीवर्जं त्रिवर्णाया गर्भः स्यात्प्रथमो यदा ॥
मासैकानन्तरं तस्या गुटिकां तां समर्पयेत् ३७४ ॥
भोजनौषधतांबूलपानवेलां विना तया ॥
अहर्निशं मूखे धार्या मासमेकं निरन्तरम् ॥ ३७५ ॥
मासे वीते च सा पृष्टा ज्ञानं वक्ति त्रिकालजम् ॥
भावि भूतं वर्त्तमानं सद्यः प्रत्ययकारकम् ॥ ३७६ ॥
गुटिकायाः प्रभावोऽयमतीवाश्चर्यकारकः ॥
रसगुट्यां जनेषु स्यात्प्रभावातिशयो महान् ॥ ३७७ ॥

श्रीभैरवगणाधिपतिलक्ष्मीसरस्वतीभ्योनमोऽस्तु येषां प्रसादाद् गुटिकांऽऽजनानि पारदाश्च सिध्यंति ॥१॥ तत्रचतुरशीति ८४ गुटिकाश्चतुरशीति ८४ अंजनानि चतुरशीति ८४ पारदकर्माणि। एवं सर्वसंख्यया त्रयाणां द्विपंचाशदधिकं शतद्वयं २५२ भवंति ॥२॥ एतेषां द्विपंचाशदधिकशतद्वयस्य मध्यादेकस्य कस्यचिद् गुटिकौषधस्यांजनस्य वा पारदस्य वा प्रारंभे आदौ तथाफलप्रांतेऽखंडं तपो विधेयम् ॥३॥ तत्र

प्रारंभे मासौकादर्वाक् निष्पत्तिसमयेऽपि फलादर्वाग् मासमेकं ब्रह्मचर्यं पालनीयं हविष्यान्नं परमान्नं च घृतादिमिश्रं दुग्धं वा भोजनीयम् ॥ ४ ॥ तपोविधानेषु क्रियाः सिध्यंति ॥ यतस्तपःसाध्या रसादयः प्रयोगा ये पुनः तपोहीनाः साधकास्तेऽततः दैवस्य कर्मणो दोषं अंतरायं वदंति ॥ ५ ॥ तेन तपस्विनां मुख्येन श्रीकंकालययोगिना वार्त्तोक्ता धातुर्वाट्टङ्गप्रोक्ता गुटिका वर्त्तते । तासां मध्याज्ज्ञानफलां ज्ञानकारणं गुटिकां वक्ष्यामि द्विपंचाशद्वल्लमात्रौषधनिष्पन्नाम् ॥ ६ ॥ तत्र चत्वारो वल्ला अभ्रकसत्वस्य चत्वारो वल्लाः स्वर्णमाक्षीकस्य चत्वारो वल्ला शुद्धरूप्यस्यैको वल्लो हेमराजेः ७ तथाऽष्टादशसंस्कारैर्यः पूर्वोक्तशुद्धपारदस्तस्य वल्ला एकोनचत्वारिंशदेवंमिलिताः सर्वे द्विपंचाशत् ५२ वल्लाः ॥ ८ ॥ खरले क्षिप्य सप्तदिनानि मर्द्दयेत् । ततो वरुणवृक्षस्य मूल श्रीखडं घृष्ट्वा ॥ ९ ॥ सर्वमौषधं वस्त्रे बध्वा दोलायंत्रे स्थालिकायां तेन श्रीषंडेन कोमलवह्निना दिनद्वयं स्वेदयित्वोत्तार्य गुटिकां कृत्वा पश्चात्क्रमेण पंचामृतेन स्वेदयेत् ॥ १० ॥ तत्र मधु घृतं दधि दुग्धं शर्करा वेति पंचामृतम् ॥ तत्रस्वेदने चायं विधिः ॥ ११ ॥ प्रथमं गुटिकां मधुना सह कांसलोहपात्रे वालुकापूर्णस्थालिकामध्ये क्षेप्यः १२ सा स्थाली चुल्हिकायां चटाय्याधोऽष्टौ प्रहरान् वह्निर्ज्वालनीयः। उपरि मधु निक्षिपेत् ॥१३॥ तदनु नष्टे नष्टे पुनः पुनमधु क्षेप्यम्। एवं प्रहराष्टकेन मधुना स्वेदयित्वोत्तार्य ततो घृतेन सह कांतलोहपात्रे गुंटो प्रक्षिप्याष्टप्रहरान् स्वेदयेद्वालुकायंत्रे । तत एवं प्रहराष्टकं दधिना ततः प्रहर ८ दुग्धेन ततः ग्रहर ८ शर्कराजलमिति । एवं पञ्चामृतेन पञ्चवारं गुटिकां स्वेदयित्वा १४ तपः कुर्वतो ब्रह्मचर्यपालयता हस्ताभ्यां प्रचाल्य द्विपंचाशवल्लमात्रा गुटिका कार्या १५ ततो यस्या मातृपक्षपितृपक्षौ निर्मलौ। या च ब्राह्मणी वा क्षत्रिया वा वैश्यी चोत्तमकुलप्रसूता ॥ १६ ॥ तस्याः शूंद्रो वर्जयित्वा यदा प्रथमो गर्भो भवति तदामासौकादनंतरं सा गुटिका समर्प्पणीया ॥ १७ ॥ तया च भोजनमौषधताम्बूलास्वादपानीयपानवेलांवर्जयित्वैकंमासं निरंतरं मुखे धारणीया ॥ १८ ॥ ततो मासे गते सति गुटिकायाः प्रभावात् पृष्टा सति सा स्त्री अतीतानागतवर्त्तमानं सद्यः प्रत्ययकारकं त्रिकालविषयज्ञानं वदति ॥ १९ ॥ अस्या गुटिकायाः प्रभावोऽतीवाश्चर्यकारकः । यतो यथा ज्ञानी यद्भाषते तत्सर्वं सत्यं भवति ॥ २० ॥ तथा

मुखे गुटिकाक्षेपमाहात्म्याद् ब्राह्मणी क्षत्रिया वैश्यी यावद्ददति तत्तथैव भवति। यतो रसस्य पारदस्य गुटिकानां तथा पातालांजनादीनाम-ञ्जनानां प्रभावातिशयो महान् गुरुरित्यर्थः। एषा किल वादिनीति गुटिका प्रोच्यते। यद्यप्यस्याः सम्यगाम्नायः सांप्रतं नोपलभ्यते, तथापि किञ्चिदक्षरार्थयुक्तया किंचिद्गुटिकांतरानुभवेन किञ्चित्तथाविधश्रुत-युक्तयनुसारेण व्याख्या। तथा चतुरशीतिगुटिका ८४ चतुरशीत्यंज-नानि ८४ चतुरशीतिरसभेदान् ८४ परिज्ञाय पूर्वश्रीकङ्कालययोगिना निजशिष्यपरिज्ञानार्थं योगक्षेमनिर्वाहार्थं सर्वेषामुपकारार्थं च किञ्चिद्रसतत्त्वमुपदिष्टम्। ततस्तच्छिष्येण स्वस्य विस्मृत्यर्थं परं-परयाऽव्यवच्छेदार्थं परेषामुपदेशार्थं चायं रसाध्यायो विरचितः॥

ग्रन्थेऽस्मिन्नेकविंशत्यधिकाराः॥

तद्यथा—प्रथमं १ अष्टादशसंस्कारसंस्कृतः शृंखलारसः॥ १ ततः-हेमराजिः घोषराजिः। माक्षिकराजिः। नागराजिः॥ २ ततः—खाप-रसस्त्वपातनविधिः॥ ३॥ ततः—मनःशिलासत्त्वपातनविधिः॥ ४॥ ततः—षट्लोहमारणविधिः॥ ५॥ ततः—त्रिधाषल्लोहद्रुतिकरणम्॥ ६॥ ततः—त्रिधाअभ्रपथहीरककरणम्॥ ७॥ तत—पञ्चधाहीरक-भस्मीकरणम्॥ ८॥ ततः—गन्धकशोधनं द्विधा॥ ९॥ ततः—द्विधा गन्धकपीठी तस्याः कर्म च॥ १०॥ ततः—गन्धकतैलम्॥११॥ ततः-गन्धकतैलेन त्रिधा हेमकर्म॥ १२॥ ततः—गन्धकतैलेनैव सहस्रवेधारसविधिः॥ १३॥ ततः—गन्धकद्रुतिपीठो॥ १४॥ ततः—गन्धकद्रुतिपीठीकर्म॥ १५॥ ततः—तालकशोधनम्॥ १६॥ ततः—तालककर्म॥ १७॥ ततः—त्रिधाभ्रकद्रुतिः॥ १८॥ ततः—तस्याः कर्माणि॥ १९॥ ततः—हेमवज्रभस्मभूनागसत्वनिष्पन्नषोटकर्माणि॥२०॥ ततः—किल वालवादिनी गुटिका॥ २१॥ इत्येकविंशतिरधिकारा निबद्धाः सन्ति। ते च यद्यपि किंचिच्चानुमानसम्भवेन किञ्चित्तथाविधवार्त्तिकेन्द्रसंसर्गजातसंस्कारेण किंचिदक्षरार्थयुक्त्या विवृत्य व्याख्याताः, तथापि यदि क्वापि किमप्यलीकं व्याख्यानं भवेत् तदा प्रसद्य श्रीवार्त्तिकेन्द्रैः श्रीरसाध्यायेन तदधिष्ठात्रिदेवताभिश्च सर्वं क्षंतव्यम्॥

यादृशं स्वधिया ज्ञातं तादृशं लिखितं मया॥
यदि क्वचिद् व्यलीकं स्यात्तदा शोध्यं विचक्षणैः॥ ७८॥

McMASTER UNIVERSITY LIBRARY

ख्यातस्तथा यादववंशरत्न-
मूंजालदेवाभिधराउलोऽभूत् ॥
तदात्मजन्मा महिपाभिधान-
स्तस्यात्मजो भादिगनामधेयः ॥ ७९ ॥

तदात्मजश्चंपकनामधेयो
रसज्ञगेयोज्ज्वलकान्तिकीर्त्तिः ॥
परोपकारैकरसः कलावान्
मनागजाकौकिल यस्य वन्धू ॥ ३८० ॥

तथा च—श्रीमानंचलगच्छनायकगुरुर्नाम्ना महेन्द्रप्रभः ।
सूरीन्द्रः क्षितिमण्डले विजयते यो गेयकीर्त्तिः सदा ॥
.....
.....

समाप्तोऽयं रसाध्यायाभिधेयो ग्रन्थः ॥

291 Jain Inscriptions. Containing Index of Places, glossary of names of Shravaka Castes and Gotras of Gachhas and Acharyas with dates. Collected and compiled by Puranchand Nahar. Part I. with plates. 1918. 50-00

292 **झालावंशवारिधि** अर्थात् समस्त झालाकुल ना इतिहास साथे विविध व्यवहारिक तेमज पारमार्थिक विषयो नो भण्डार-राजकवि नाथुराम सुन्दरजी रचेल 100-00

293 Journal from Calcutta in Bengal by Sea, to Busserah : from thence accross the Great desert to Aleppo : and from thence to Marseilles, and thro' France to England in the year MDCCL by Mr. Bartholomew Plaisted. 1758. 55-00

294 Journal of the Bombay Art Society. 1906-1910. 10-00

295 Journal of Indian Art and Industry :—

Vol. IX. October, 1901 No. 76. Contents : Glass Mosaics of Burma by Harry L. Tilly. With 13 illustrations. Modern Indo-Saracenic (Sandeman Hall, Quetta), by Ivie Hamilton. With plan and 3 illustrations. 20-00

Vol. XI January, 1906 No. 93. Contents : Indian Carpets and Rugs. Illustrated by Three page plates in colours and sixteen page plates in Monochrome. 75-00

Vol. XIII. October, 1909 No. 108. Contents : The Silk Industries of India and the Personal History of Sir Thomas Wardle. 35-00

296 Journal of the Bombay Branch of the Royal Asiatic Society. New Series :—

Vols.	Nos.	Year.	Vols.	Nos.	Year.
I	1-2	1925	XVI		1940
II	2	1926	XVII		1941
III	1-2	1927	XVIII		1942
IV	1-2	1928	XIX		1943
V	1-2	1929	XX		1944
VI	1-2	1930	XXIV-XXV		1949-49
VII	1-2	1931	XXVI	1-2	1950-51
VIII	1-2	1932	XXVII	1-2 & Suppliment	1951-52
IX	1-2	1933			
X	1-2	1934	XXVIII	1-2	1953
XII		1936	XXIX	1-2	1954
XIII		1937	XXX	1-2	1955
XIV		1938			

Price Rs. 315-00

297 Journal of the Disasters in Affghanistan 1841–1842 by Lady Sale. 1906. (Wormed) 50–00

298 Journal of the Indian Society of Oriental Art. Vol. XV. 1947. (A. K. Coomara Swamy Commemoration Vol.) Edited by A. Tagore and Stella Kramrisch. 75–00

299 Journal of The Royal Asiatic Society of Great Britain and Ireand. (Each year 4 Issues) :—

Year	Issue	Year	Issue	Year	Issue
1835	1–4	1910	1–4	1932	1, 3 & 4
1836	2	1911	1–4	1933	1–4
1837	1–4	1912	1–4	1934	1–4
1865	1–4	1913	2 & 3	1935	2 & 3
1866	1–4	1914	1–4	1936	1–4
1882	1	1915	1, 2 & 3	1937	1–4
1885	1	1916	1–4	1938	2, 3 & 4
1887	4	1917	1–4	1939	1 & 4
1889	4	1918	1–4	1940	3
1891	2	1919	1, 3 & 4	1941	2, 3 & 4
1898	1 & 3	1920	1, 2 & 4	1942	1–4
1899	1 & 3	1921	1–4	1944	1–4
1900	1–4	1922	2 & 4	1945	3 & 4
1902	2	1923	3	1946	1 & 2
1904	1–4	1925	2	1948	3 & 4
1905	2, 3 & 4	1926	3	1950	1–4
1906	1–4	1928	1, 2 & 4	1951	1–4
1907	1–4	1929	2 & 3	1952	1–4
1908	1 & 2	1930	1–4	1954	3 & 4
1909	1–4	1931	1, 2 & 3		

Price for the above 27 Years complete issues & 62 loose issues Sold in one Lot. 2250–00

300 Journal of 'Indian Art and Letters' :—
Vol. I. No. I, 1925. Vol. II. Nos. I & 2, 1926. 30–00

301 Journal of 'Indian Art and Letters.' New Series. Vols. I–V, each Vol. 2 Nos. 1927–31., Vol. VII. No. 2, 1933., Vol. VIII. Nos. 1–2, 1934., Vol. XI. Nos. 1–2, 1937. Vol. XIII. No. 2, 1939., Vol. XIV. No. 1, 1940., Vol. XV. No. 1, 1941., Vol. XVII. No. 2, 1943., Vols. XIX–XXII, each Vol. 2 Nos. 1945–1948., Vol. XXIV.

326049

together with some others specially written for this Volume. 1911. (Worm eaten) 35-00

482 Religious Thought in the Eighteenth Century. Illustrated from Writers of the period by J. M. Creed and J. S. Boys Smith. 22-50

483 Rigveda Paratiskhya of the Rigveda by Saunaka. With the commentary of Uvvata. Edited and annotated by Pt. Yugalkishore Vyasa. Complete in 4 fas. Nos. 48, 59, 64 and 79 (Banaras Sanskrit Series). 50-00

484 Rigveda Samhita Madhaviya Vedarthaprakash Bhashya of Sayanacharya up to Mandal eight, Adhyaya five and Sukta eleven. Edited by Prasanna Kumar Vidyaratna. 3 Vols. Shaka (year) 1810. 75-00

485 Rigveda Samhita with Sanskrit and Hindi commenaries by Swami Dayananda Saraswati : Mandal I (Upto 4th Adyaya 61 Sukta) Mandals II-VI complete and

)0

486 R

)0

487)0

488

PK
2[illegible]71
K29
no.79

)0

489)0

490

)0

491

)0

49[illegible]

)0

OCT - - 1968



७३ काकचण्डीश्वरकल्पतन्त्रम् । पण्डित रामकृष्ण शर्म्मणा सम्पादितम् । पण्डित बटुकनाथ शर्म्मा एम. ए. साहित्योपाध्याय इत्येतेन लिखितया प्रस्तावनया सनाथीकृतम् । [आयुर्वेद शास्त्रविभागे १] रु० ०—८

७४ किरातार्जुनीयम् । श्रीमत्कविकुलचूडामणिभारविविरचितम् मल्लिनाथसूरिकृतया घण्टापथसमाख्यव्याख्यया तथा पं० श्रीगङ्गाधरशर्मणा कृतया सुधाऽऽख्यव्याख्यया समलङ्कृतम् । [सर्गत्रयमात्रम्] । [काव्य वि० १०] रु० ०—१२

७५ चन्द्रालोकः । पीयूषवर्षश्रीजयदेवकवि प्रणीतः । श्रीमत्पद्मनाभमिश्रापराभिधान प्रद्योतनभट्टाचार्य विरचितया चन्द्रालोकप्रकाशापराख्य 'शरदागम' टीकया सङ्कलितः । साहित्याचार्येण खिस्ते इत्युपाख्यनारायणशास्त्रिणा भूमिकादिभिः सम्भूष्य सम्पादितः । [अलङ्कार वि० ३] रु० ०—१२

७६ किरातार्जुनीयम् । श्रीमत्कविकुलचूडामणिभारविविरचितम् । मल्लिनाथसूक्तिकृतया घण्टापथसमाख्यया तथा पं० श्रीकनकलालशर्मणा कृतया भावार्थदीपिनीव्याख्यया समलङ्कृतम् । [सर्गत्रयमात्रम्] [काव्य वि० ११] रु० ०—६

७७ शक्तिवादः, श्रीगदाधरभट्टाचार्यप्रणीतः, पण्डितप्रवरश्रीहरिनाथतर्कसिद्धान्तभट्टाचार्यविरचितविवृतिसहितः । [न्यायविभागे १०] रु० ३—०

७८ माथुरीपञ्चलक्षणी । पं० श्रीउमानाथार्ज्यालकृतव्याख्या सहिता तथा माथुरीसिंहव्याघ्रलक्षणम् । पं० श्रीहरिरामशुक्ल विरचितया व्याख्यया सहितं तथा पं० श्रीहरिहरशास्त्रि सङ्कलित माथुरीपञ्चलक्षणी क्रोडपत्रेण च । [न्याय वि० ११] रु० ०—६

७९ रसाध्यायः । टीकया संवलितः । [आयुर्वेदशास्त्र वि० २] रु० ०—१०

८० पाणिनिव्याकरणे वादरत्नम् । न्यायव्याकरणाचार्य मीमांसक शिरोमणि पं० सूर्यनारायणशुक्लेन विरचितम् । (तत्र च न्यास परिष्कारपरिशिष्टभेदेन प्रकरण त्रयम् यत्र पञ्चन्यून सार्धशतसूत्रेषु १४५ महताटोपेन न्यासाविचारिताः तत्र प्रथमं प्रकरणं मुद्रितं द्वितीय प्रकरणमपि मुद्रित प्रायं शेघ्रमेव भवन्तं दृष्टि पथमधिगमिष्यतीति ।) प्रथमो भाग । (व्या० वि १०)रु०१—८

मुद्र्यमाणग्रन्थाः

१ शारदातिलकम् । श्रीमद्राघवभट्टकृतपदार्थादर्शटीकसहितम् ।

२ मेघदूतम् । महामहोपाध्याय मल्लिनाथकृत संजीविनी तथा चारित्रवर्द्धन विरचित टीकाद्वयोपेतम् ।

३ वाग्वल्लभः । श्रीयुत दुःखभञ्जनकवि विरचित वरवर्णनीव्याख्या संवलितः ।

सर्वविधपुस्तकप्राप्तिस्थानम्—
जयकृष्णदास-हरिदास गुप्तः—
चौखम्बा संस्कृत सीरिज़ आफिस,
विद्याविलास प्रेस, चौखम्बा-स्थित के लिए प्रकाशक, बनारस सिटी ।